# प्रस्तावना.

अस्ति विदितमेतद्विदुषां यज्ज्ञानावतारेण भगवता न[illegible]रायणेन कृष्णद्वैपायनेन व्यासेन महाभारतव्यपदेशेन [illegible]ब्रह्मावबोधको वेदार्थः प्रदर्शितः। तत्र शतं पर्वाणि। [illegible]षूद्योगपर्वान्तर्गतमेतद्विदुरनीतिनामकं प्रजागरपर्व विद्यते। अत्र सर्वसाधारणी नीतिविद्या संक्षेपत उपदिष्टास्ति। तदिदं नीतिविद्यां बुभुत्सूनां जनानामतीवोपयोगि भविष्यतीति मया सप्रणयप्रश्रयं भट्टवालजीतनुजनुषं शास्त्रिश्यामजीशर्माणमुपसंगम्य तत्कृतेन विषमपदविमर्शटिप्पणेन परिष्कृतं सरलेन गुर्जरभाषान्तरेण संयोजितं च मुद्रितम्। यद्यप्यस्य बहुशो मुद्रितस्यापि मुद्रणं पिष्टपेषणायत इति कदाचिदनादरभूमिमारोक्ष्यतीति मा मंस्थाः। नाद्यावधि मुद्रितमेतदियतीं सुलभपदवीमधिरूढं यत्संजिघृक्षूणामत्यल्पेन धनेन महतो ज्ञानस्य लाभाय हेतुरभूत्। संप्रति हि विविधाभिर्विधाभिर्विवर्धमानासु विद्यासु सकलव्यवहारज्ञानकल्पलताया नीतिविद्याया उन्मेषं को नाम विशेषवित्प्रत्याचक्षीत। न चैतदपि वक्तव्यं यद्भा-

प्रवीणः। [illegible]ष्कृतानां नीतिग्रन्थानां मुद्रणं नावश्यकमस्तीति भावस्तस्मात् [illegible]रस्म[illegible]।माहितं शुक्रनीतिप्रस्तावनायामस्माभिः।

युधिष्ठिर इति [illegible]

धनादिषु ऐश्वर्ये रा[illegible]दुरनीतिपुस्तकं गुर्जरभाषान्तरेण सनाथं मुद्र-

प्रकारेणेच्छसि।

# विदुरनीतिः

## वैशम्पायन उवाच

द्वाःस्थं प्राह महाप्राज्ञो धृतराष्ट्रो महीपतिः ।
विदुरं द्रष्टुमिच्छामि तमिहानय मा चिरम् ॥ १ ॥

प्रहितो धृतराष्ट्रेण दूतः क्षत्तारमब्रवीत् ।
ईश्वरस्त्वां महाराजो महाप्राज्ञ दिदृक्षति ॥ २ ॥

एवमुक्तस्तु विदुरः प्राप्य राजनिवेशनम् ।
अब्रवीद्धृतराष्ट्राय द्वाःस्थ मां प्रतिवेदय ॥ ३ ॥

## द्वाःस्थ उवाच

विदुरोऽयमनुप्राप्तो राजेन्द्र तव शासनात् ।
द्रष्टुमिच्छति ते पादौ किं करोतु प्रशाधि माम् ॥ ४ ॥

## धृतराष्ट्र उवाच

प्रवेशय महाप्रज्ञं विदुरं दीर्घदर्शिनम् ।
अहं हि विदुरस्यास्य नाकल्पो जातु दर्शने ॥ ५ ॥

## द्वाःस्थ उवाच

प्रविशान्तःपुरं क्षत्तर्महाराजस्य धीमतः ।
नहि ते दर्शनेऽकल्पो जातु राजाब्रवीद्धि माम् ॥ ६ ॥

---

प्रवीणः । ...ाःस्थः द्वारपालः । २ क्षत्ता विदुरः । ३ दिदृक्षति भावस्तस्मात् ...रस्मैपदमार्षम् । ४ विदुर आगत इति ज्ञापय । ५ युधिष्ठिर इति श...ाकल्पः "कृपू सामर्थ्ये" कल्पः समर्थः न कल्पः धनादिषु ऐश्वर्ये राज्... । "सर्वदा विदुरसंदर्शनं ममाप्रत्याख्येयमि प्रकारेणेच्छसि । ... ... कदाचित् ।

### वैशम्पायन उवाच

ततः प्रविश्य विदुरो धृतराष्ट्रनिवेशनम् ।
अब्रवीत्प्रांजलिर्वाक्यं चिंतयानं[1] नराधिपम् ॥ ७ ॥
विदुरोऽहं महाप्राज्ञ संप्राप्तस्तव शासनात् ।
यदि किंचन कर्तव्यमयमास्मि प्रशाधि माम् ॥ ८ ॥

### धृतराष्ट्र उवाच

संजयो विदुर प्राज्ञो गर्हयित्वा च मां गतः ।
अजातशत्रोः[2] श्वो वाक्यं सभामध्ये स वक्ष्यति ॥ ९ ॥
तस्याद्य कुरुवीरस्य न विज्ञातं वचो मया ।
तन्मे दहति गात्राणि तदकार्षीत्प्रजागरम्[3] ॥ १० ॥
जाग्रतो दह्यमानस्य श्रेयो यदनुपश्यासि ।
तद्ब्रूहि त्वं हि नस्तात[4] धर्मार्थकुशलो ह्यसि ॥ ११ ॥
यतः[5] प्राप्तः संजयः पांडवेभ्यो न मे यथावन्मनसः प्रशांतिः ।
सर्वेंद्रियाण्यप्रकृतिं गतानि किं वक्ष्यतीत्येव मेऽद्य प्रचिंता[6] १२।

### विदुर उवाच

अभियुक्तं[7] बलवता दुर्बलं हीनसाधनम्[8] ।
हृतस्वं[9] कामिनं चोरमाविशंति प्रजागराः ॥ १३ ॥
कांच्चिदेतैर्महादोषैर्न[10] स्पृष्टोऽसि नराधिप ।

---

१ चिन्तयानं शोचन्तम् । २ अजातशत्रोर्युधिष्ठिरस्य । […]
प्रजागरो "निद्राया अभावः" नी० । ४ तात वत्स । ५ […]
प्राप्तःसंजयस्तदारभ्येत्यर्थः । ६ प्रचिन्ता प्रकृष्टा चि[…]
७ अभियुक्तं योद्धुमुद्युक्तम् । ८ स्वल्पसैन्यादिसाहि[…]
तधनम । १० "कच्चित्कामप्रवेदने" इत्यम[…]
मिष्टपरिप्रश्न इति तट्टीकायाम ।

कच्चिच्च परवित्तेषु [1]गृध्यन्न परितप्यसे ॥ १४ ॥

### धृतराष्ट्र उवाच

श्रोतुमिच्छामि ते [2]धर्म्यं परं नैःश्रेयसं वचः ।
अस्मिन्राजर्षिवंशे हि त्वमेकः प्राज्ञसंमतः ॥ १५ ॥

### विदुर उवाच

राजा [3]लक्षणैःसंपन्नस्त्रैलोक्यस्याधिपो भवेत् ।
[4]प्रेष्यस्ते प्रेषितश्चैव धृतराष्ट्र युधिष्ठिरः ॥ १६ ॥
[5]विपरीततरश्च त्वं [6]भागधेये न संमतः ।
[7]अर्चिषां प्रक्षयाच्चैव धर्मात्मा धर्म[8]कोविदः ॥ १७ ॥
[9]आनृशंस्याद[10]नुक्रोशाद्धर्मात्सत्यात्पराक्रमात् ।
[11]गुरुत्वात्त्वयि संप्रेक्ष्य बहून्क्लेशांस्ति[12]तिक्षते ॥ १८ ॥
दुर्योधने [13]सौबले च कर्णे दुःशासने तथा ।
[14]एतेष्वैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि ॥ १९ ॥
आत्मज्ञानं समारंभस्तितिक्षा धर्मनित्यता ।
यमर्थान्नापकर्षंति स वै पंडित उच्यते ॥ २० ॥

---

१ अभिकाङ्क्षमाणः २ धर्म्यं धर्मादनपेतं धर्मसहितमित्यर्थः । ३ राजचिन्हसहितः । ४ "प्रकर्षेण एषणीयः प्रेष्यः ते त्वया वनं प्रेषितः" इति नी० । ५ अतिशयेन विपरीतः विपरीततरोराजलक्षणहीनः । ६ भागधेये राज्यांशे ७ नेत्ररश्मीनाम् । ८ कोविदः प्रवीणः । ९ आनृशंस्यात् नृशंसः क्रूरः न नृशंसः अनृशंसः तस्य भावस्तस्मात् । १० दया ११ पूज्यत्वम् १२ तितिक्षते सहते युधिष्ठिर इति शेषः १३ सौबलिः शकुनिः । १४ एतेषु दुर्योधनादिषु ऐश्वर्यं राज्यधुरं आधाय निधाय भूतिं समृद्धिं कथं केन प्रकारेणेच्छसि ।

निषेवते प्रशस्तानि निंदितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत्पंडितलक्षणम् ॥ २१ ॥
क्रोधो हर्षश्च दर्पश्च ह्रीस्तंभो मान्यमानिता ।
यमर्थान्नापकर्षंति स वै पंडित उच्यते ॥ २२ ॥
यस्य कृत्यं न जानंति मंत्रं वा मंत्रितं परे ।
कृतमेवास्य जानंति स वै पंडित उच्यते ॥ २३ ॥
यस्य कृत्यं न विघ्नंति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पंडित उच्यते ॥ २४ ॥
यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पंडित उच्यते ॥ २५ ॥
यथाशक्ति चिकीर्षंति यथाशक्ति च कुर्वते ॥
न किंचिदवमन्यंते नराः पंडितबुद्धयः ॥ २६ ॥
क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।
नासंपृष्टो व्युपयुंक्ते परार्थे तत्प्रज्ञानं प्रथमं पंडितस्य ॥ २७ ॥
नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुम् ।
आपत्सु च न मुह्यंति नराः पंडितबुद्धयः ॥ २८ ॥

---

१ "एतेषु पाण्डित्यं नास्तीति वक्तुं पण्डितलक्षणान्याह" नी० आत्मज्ञानादीनि यथायथमनुष्ठितानि पुरुषार्थान्न विद्वांसं भ्रंशयन्ति मूर्खं तु भ्रंशयन्ति । कुतः आत्मज्ञानं शास्त्रीयापेक्षं, समारम्भः शक्त्यपेक्षः, तितिक्षा वैराग्यापेक्षा, धर्मनित्यता श्रद्धापेक्षा । २ दर्पो गर्वः तेन परावमाननं भवति । ३ लज्जा । ४ स्तम्भः असन्नतिः ५ "मान्यमानिता मान्यं मानार्हमात्मानं मन्यत इति मान्यमानी तस्य भावस्तत्ता" नी० । ६ इतरे शत्रवो वा । ७ संसारिणी अनवस्थिता संसरणशीलेति भावः । ८ स्वाकुरुते । ९ कर्तुमिच्छन्ति । १० तिरस्कुर्वते । ११ असंपृष्टोः यथावदपृष्टः । १२ व्युपयुङ्क्ते वाग्व्ययं करोति । १३ प्रज्ञानं लक्षणम् । १४ अप्राप्यमुपायशतैरपि प्राप्तुमशक्यम् ।

निश्चित्य[1] यः प्रक्रमते[2] नांतर्वसति[3] कर्मणः ।
अवंध्यकालो[4] वश्यात्मा स वै पंडित उच्यते ॥ २९ ॥
आर्यकर्माणि[5] रज्यंते[6] भूतिकर्माणि[7] कुर्वते ।
हितं च नाभ्यसूयांति[8] पंडिता भरतर्षभ ॥ ३० ॥
न हृष्यत्यात्मसंमाने नावमानेन तप्यते ।
गांगो ह्रद इवाक्षोभ्यो यः स पंडित उच्यते ॥ ३१ ॥
तत्त्वज्ञः[9] सर्वभूतानां योगज्ञः[10] सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां[11] नरः पंडित उच्यते ॥ ३२ ॥
प्रवृत्तवाक्[12]चित्रकथ[13] ऊहवान्[14] प्रतिभानवान्[15] ।
आशु ग्रंथस्य वक्ता च यः स पंडित उच्यते ॥ ३३ ॥
श्रुतं प्रज्ञानुगं[16] यस्य प्रज्ञा चैव श्रुतानुगा[17] ।
असंभिन्नार्यमर्यादः पंडिताख्यां लभेत सः ॥ ३४ ॥
अश्रुतश्च[18] समुन्नद्धो[19] दरिद्रश्च महामनाः ।
अर्थांश्चाकर्मणा[20] प्रेप्सुर्[21]मूढ इत्युच्यते बुधैः ॥ ३५ ॥

---

१ निश्चित्य स्वप्रयत्नसाध्यत्वं निर्धाय । २ आरभते । ३ प्रारब्धमसमाप्यैव न विरमति । ४ अवन्ध्यकालः नास्ति वन्ध्यः फलरहितः कालो यस्य सः । सर्वदा सफलमेव कर्माचरतीति भाव;। ५ सत्पुरुषयोग्यकार्ये ६ प्रीयन्ते ७ समृद्धिसंपादकानि कर्माणि । ८ द्विषन्ति । ९ तत्त्वं विनाशित्वं जानाति । १० रचनाप्रकारज्ञः । ११ मनुष्याणां मध्ये निर्धारणे षष्ठी । १२ अस्खलितवचनः । १३ नानेतिहासज्ञः । १४ तर्कवान् । १५ प्रतिभावान् 'प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः' १६ बुद्धिवश्यं शास्त्रम । १७ शास्त्रानुसारिणी बुद्धिः नी०। १८ पूर्वोक्तपण्डितलक्षणविरहात्ते दुर्योधनादयस्ते विश्वासपात्राणि मूर्खाः सन्तीति ज्ञापनाय मूर्खलक्षगाणि वक्तुमुपक्रमते । १९ उत्सिक्तः। २० हीनकर्मणा द्यूतादिनेत्यर्थः । २१ एतादृशो दुर्योधनोस्ति ।

स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः[1] स उच्यते ॥ ३६ ॥
अकामान्[2]कामयति यः कामयानान्[3]परित्यजेत् ।
बलवंतं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥ ३७ ॥
अमित्रं कुरुते मित्त्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ ३८ ॥
संसा[4]रति कृत्यानि सर्वत्र विचिकित्सं[5]ते ।
चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ ॥ ३९ ॥
श्राद्धं पितृभ्यो न ददाति दैवतानि न चार्चति ।
सुहृन्मित्रं न लभते तमाहुर्मूढचेतसम् ॥ ४० ॥
अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ ४१ ॥
परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशा[6]नः स च मूढतमो नरः ॥ ४२ ॥
आत्मनो बलमज्ञाय धर्मार्थपरिवर्जितम् ।
अलभ्यमिच्छन्नै[7]ष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ ४३ ॥
अशिष्यं शास्ति यो राजन्यश्च शून्यमुपासते ।
क[9]दर्यं भजते यश्च तमाहुर्मूढचेतसम् ॥ ४४ ॥

---

१ एतादृशः शकुनिरस्ति । २ भक्तिहीनान् कर्णादीन् । ३ भक्तिमतः पाण्डवादीन् । ४ भृत्यादिद्वारा प्रवर्तयति । ५ संदिग्धे ६ असमर्थः । ७ अयत्नतः नी० अनुद्योगात् । ८ राजदारादीनज्ञातं यथा स्यात्तथोपास्ते । ९ अदातारम् ।

[6]अर्थं महांतमासाद्य विद्यामैश्वर्यमेव वा ।
विचरत्य[2]समुन्नद्धो यः स पंडित उच्यते ॥ ४५ ॥
एकः संप[3]न्नमश्नाति [4]वस्ते वासश्च शोभनम् ।
योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः ॥ ४६ ॥
एकः पापानि कुरुते फलं भुंक्ते महाजनः ।
भोक्तारो विप्रमुच्यंते कर्ता दोषेण लिप्यते ॥ ४७ ॥
एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं स[5]राजकम् ॥ ४८ ॥
[1]एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु ।
पंच जित्वा विदित्वा षट् सप्त हित्वा सुखी भव ॥ ४९ ॥
एकं विषरसो हंति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सप्रजं हंति राजानं मंत्रविप्ल[7]वः ॥ ५० ॥
एकः स्वादु न भुंजीत एकश्चार्थान्न चिंतयेत् ।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥ ५१ ॥
एकमेवाद्वितीयं तद्यद्राजन्नावबुध्यसे ।
सत्यं स्वर्गस्य सोपानं पारा[8]वारस्य नौरिव ॥ ५२ ॥

---

१ अस्य श्लोकस्य नीत्यध्यात्मपक्षभेदेन द्वावर्थौ । एकया बुद्ध्या । द्वे कार्याकार्ये नीतौ नित्यानित्ये अध्या० । त्रीन् मित्रोदासीनशत्रून् नीतौ कामक्रोधलोभान् अध्या० चतुर्थैः सामदानभेददण्डैः नी० शमदमोपरमश्रद्धाभिः अध्या० । पञ्च इन्द्रियाणि । षट् संधिविग्रहादीन् नी० अशनायापिपासाशोकमोहजरामृत्यून् अध्या० । सप्त 'स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम् । महच्च दण्डपारुष्यमर्थदूषणमेव च' नीतौ पञ्चेन्द्रियाणि बुद्धिमनसी अध्यात्मपक्षे । २ अनुद्धत इतिनी० । ३ स्वादु ४ परिधत्ते । ५ राजसहितम् । ६ पुनः पण्डितलक्षणमाह । ७ रहस्यनाशः । ८ सागरस्य ।

एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ५३ ॥
सोऽस्य दोषो न मंतव्यः क्षमा हि परमं बलम् ।
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥
क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते ॥ ५४ ॥
शांतिखड्गः करे यस्य किं करिष्यति दुर्जनः ।
अतृणे पतितो वन्हिः स्वयमेवोपशाम्याति ॥ ५५ ॥
अक्षमावान्परं दोषैरात्मानं चैव योजयेत् ।
एको धर्मः परं श्रेयः क्षमैका शांतिरुत्तमा ॥
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥ ५६ ॥
द्वाविमौ ग्रसते भूमिः सर्पो विलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ ५७ ॥
द्वे कर्मणी नरः कुर्वन्नस्मिंल्लोके विरोचते ।
अब्रुवन्पुरुषं किंचिदसतोऽनर्चयंस्तथा ॥ ५८ ॥
द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ[1] ॥
स्त्रियः कामितकामिन्यो लोकः पूजितपूजकः[2] ॥ ५९ ॥
द्वाविमौ कंटकौ तीक्ष्णौ शरीरपरिशोषिणौ ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः[3] ॥ ६० ॥
द्वावेव न विराजेते विपरीतेन कर्मणा ।
गृहस्थश्च निरारंभः कार्यवांश्चैव भिक्षुकः[4] ॥ ६१ ॥
द्वाविमौ पुरुषौ राजन्स्वर्गस्योपरि तिष्ठतः ।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ॥ ६२ ॥

---

१ परविश्वासेन कार्यकर्तारौ । २ पूजितस्य कर्णस्य पूजकस्त्वम । ३ अशक्तः । ४ उदासीनः ।

न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ ।
अपात्रे प्रतिपत्तिश्च[1] पात्रे चाप्रतिपादनम्[2] ॥ ६३ ॥

द्वावंभसि निवेष्टव्यौ गले बध्वा दृढां शिलाम् ।
धनवंतमदातारं दरिद्रं चातपस्विनम् ॥ ६४ ॥

द्वाविमौ पुरुषव्याघ्र सूर्यमंडलभेदिनौ ।
परिव्राड्[3]योगयुक्तश्च रणे चाभिमुखो हतः ॥ ६५ ॥

त्रयोपाया[4] मनुष्याणां श्रूयंते भरतर्षभ ।
कनीयान्मध्यमः श्रेष्ठ इति वेदविदो विदुः ॥ ६६ ॥

त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः ।
नियोजयेद्यथावत्तांस्त्रिविधेष्वेव कर्मसु ॥ ६७ ॥

त्रय एवाधना[5] राजन्भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥ ६८ ॥

हरणं च परस्वानां परदाराभिमर्शनम् ।
सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः ॥ ६९ ॥

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामःक्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ ७० ॥

वरप्रदानं राज्यं च पुत्रजन्म च भारत ।
शत्रोश्च मोक्षणं कृच्छ्रात्त्रीणि चैकं च तत्समम् ॥ ७१ ॥

भक्तं च भजमानं च तवास्मीति च वादिनम् ।
त्रीनेतांश्छरणं प्राप्तान्विषमे[6]ऽपि न संत्यजेत् ॥ ७२ ॥

---

१ दानम् । २ अदानम् । ३ संन्यासी । ४ उपाया इति च्छेदः । युद्धं कनीयान् भेददाने मध्यमः साम उत्तमः । अपाया इतिच्छेदे काम्ययोगः कनीयान्काम्यधर्मो मध्यमः इह लोके लोभोऽधम इति नील० । ५ अस्वतन्त्राः । ६ विपत्तिसमये ।

चत्वारि राज्ञा तु महाबलेन ।
वर्ज्यान्याहुः पण्डितस्तानि विद्यात् ।
अल्पप्रज्ञैः सह मंत्रं न कुर्या ।
न्न [1]दीर्घसूत्रै [2]रभसैश्चा[3]रणैश्च ॥ ७३ ॥

चत्वारि ते तात गृहे वसंतु श्रियाभिजुष्टस्य गृहस्थधर्मे ।
वृ[4]द्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्या ॥ ७४ ॥

चत्वार्याह महाराज सा[5]द्यस्कानि बृहस्पतिः ।
पृच्छते त्रिदशेंद्राय तानीमानि निबोध मे ॥ ७५ ॥
देवतानां च संक[6]ल्पमनुभा[7]वं च धीमताम् ।
विनयं कृतविद्यानां विनाशं पापकर्मणां ॥ ७६ ॥
चत्वारि कर्माण्यभयंकराणि भयं प्रयच्छंत्ययथाकृतानि ।
मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः ॥ ७७ ॥
पंचाग्नयो मनुष्येण परिचर्या[8]ः प्रयत्नतः ।
पिता मताग्निरात्मा[9] च गुरुश्च भरतर्षभ ॥ ७८ ॥
पंचैव पूजयंल्लोके यशः प्राप्नोति केवलं ।
देवान्पितृन्मनुष्यांश्च भिक्षूनतिथिपंचमान् ॥ ७९ ॥
पंच त्वानुगामिष्यंति यत्र यत्र गामिष्यासि ।

---

१ चिरकारी विलम्बेन कार्यकर्त्तेतिभावः । २ हर्षतरलैः नी० रभसैरित्यत्र अलसैरित्यपिपाठः ३ चारणैः स्तावकैर्वा च अरणै रणरहितैर्भीरुभिः । अशनैरिति वा पाठान्तरम् ४ वृद्धः कुलधर्मानुपदिशति, कुलीनशिशून् आचारं ग्राहयति, सखा हितं वदति, भगिनी धनं रक्षति नीलकण्ठः, ५ सद्यः फलप्रदानि । ६ मानसं कर्म । ७ प्रभावः । ८ सेव्याः । ९ परमेश्वरो जीवोन्तर्यामी वा ।

मित्त्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः[1] ॥ ८० ॥
पंचेंद्रियस्य मर्त्यस्य छिद्रं चेदेकमिंद्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः[2] पात्रादिवोदकम् ॥ ८१ ॥
षड् दोषाः पुरुषेणेह हातव्या[3] भूतिमिच्छता ।
निद्रा तंद्री[4] भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ८२ ॥
षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ८३ ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ ८४ ॥
षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥ ८५ ॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥ ८६ ॥
षण्णामात्मानि नित्यानामैश्वर्यं[6] योऽधिगच्छति ।
न स पापैः कुतोऽनर्थैर्युज्यते विजितेंद्रियः ॥ ८७ ॥
षडिमे षट्सु जीवंति सप्तमो नोपलभ्यते ।
चौराः प्रमत्ते जीवंति व्याधितेषु चिकित्सकाः[7] ॥ ८८ ॥
प्रमदाः कामयानेषु यजमानेषु याजकाः ।
राजा विवदमानेषु[8] नित्यं मूर्खेषु पंडिताः ॥ ८९ ॥

---

१ उपजीव्यागुरवः । २ चर्ममयाज्जलपात्रात् । ३ त्याज्याः
४ तन्द्रा । ५ कामक्रोधौ शोकमोहौ मदमानौ । ६ वशित्वम् ।
७ वैद्याः । ८ परस्परं कलहायमानेषु ।

मित्त्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः ॥ ८० ॥
पंचेंद्रियस्य मर्त्यस्य छिद्रं चेदेकमिंद्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः पात्रादिवोदकम् ॥ ८१ ॥
षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तंद्री भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ८२ ॥
षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ८३ ॥
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ ८४ ॥
षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥ ८५ ॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोर्थऽकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥ ८६ ॥
षण्णामात्मानि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापैः कुतोऽनर्थैर्युज्यते विजितेंद्रियः ॥ ८७ ॥
षडिमे षट्सु जीवंति सप्तमो नोपलभ्यते ।
चौराः प्रमत्ते जीवंति व्याधितेषु चिकित्सकाः ॥ ८८ ॥
प्रमदाः कामयानेषु यजमानेषु याजकाः ।
राजा विवदमानेषु नित्यं मूर्खेषु पंडिताः ॥ ८९ ॥

---

१ उपजीव्यागुरवः । २ चर्ममयाज्जलपात्रात् । ३ स्राव्याः
४ तन्द्रा । ५ कामक्रोधौ शोकमोहौ मदमानौ । ६ वशित्वम् ।
७ वैद्याः । ८ परस्परं कलहायमानेषु ।

षडिमानि विनश्यंति मुहूर्तमनवेक्षणात् ।
गावः सेवा कृषिर्भार्या विद्या वृषलसंगतिः[1] ॥ ९० ॥
षडेते ह्यवमन्यंते नित्यं पूर्वोपकारिणम् ।
आचार्यं शिक्षिताः शिष्याः कृतदाराश्च मातरम् ॥ ९१ ॥
नारीं विगतकामास्तु कृतार्थाश्च प्रयोजकम् ।
नावं निस्तीर्णकांतारा आतुराश्च[2] चिकित्सकम् ॥ ९२ ॥
आरोग्यमानृण्यमविप्रवासः सद्भिर्मनुष्यैः सह संप्रयोगः ।
स्वप्रत्यया[3] वृत्तिरभीतवासः षट् जीवलोकस्य सुखानि
राजन् ॥ ९३ ॥
[4]ईर्षुर्घृणी न संतुष्टः क्रोधनो नित्यशंकितः ।
परभाग्योपजीवी च षडेते नित्यदुःखिताः ॥ ९४ ॥
सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः ।
प्रायशो यैर्विनश्यंति कृतमूला अपीश्वराः ॥ ९५ ॥
स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पंचमम् ।
महच्च दंडपारुष्यमर्थदूषणमेव च ॥ ९६ ॥
अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः ।
ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ ९७ ॥
ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
रमते निंदया चैषां प्रशंसां नाभिनंदति ॥ ९८ ॥
नैनान्स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
एतान्दोषान्नरः प्राज्ञो बुध्येद्बुद्ध्वा विसर्जयेत् ॥ ९९ ॥

---

१ वृषलस्य शूद्रस्य संगतिः । २ रोगिणः आरोग्ये संपन्ने । ३ स्वानुकूलवृत्तिः जीविका नील० । ४ परोत्कर्षासहिष्णुः दयावान् ।

अष्टाविमानि हर्षस्य नवनीतानि भारत ।
वर्तमानानि दृश्यंते तान्येव स्वसुखान्यपि ॥ १०० ॥
समागमश्च सखिभिर्महांश्चैव धनागमः ।
पुत्रेण च परिष्वंगः संनिपातश्च मैथुने ॥ १ ॥
समये च प्रियालापः स्वयूथ्येषु[१] समुन्नतिः ।
अभिप्रेतस्य लाभश्च पूजा च जनसंसादि ॥ २ ॥
अष्टौ गुणाः पुरुषं दीपयंति प्रज्ञा च कौल्यं[२] च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ ३ ॥
नवद्वारं[३]मिदं वेश्म[४] त्रिस्थूणं[५] पंचसाक्षिकम्[६] ।
क्षेत्रज्ञा[७]धिष्ठितं विद्वान्यो वेद स परः कविः[८] ॥ ४ ॥
दश धर्मं न जानंति धृतराष्ट्र निबोध तान् ।
मत्तः[९] प्रमत्तं[१०] उन्मत्तः[११] श्रांतः क्रुद्धो बुभुक्षितः ॥ ५ ॥
त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश ।
तस्मादेतेषु सर्वेषु न प्रसज्जेत पंडितः ॥ ६ ॥
अत्रैवोदाहरंतीममितिहासं पुरातनम् ।
पुत्रार्थमसुरेंद्रेण गीतं चैव सुधन्वना ॥ ७ ॥
यः काममन्यू[१२] प्रजहाति राजा पात्रे प्रतिष्ठापयते धनं च ।
विशेषविच्छ्रुतवान् क्षिप्रकारी तं सर्वलोकः कुरुते प्रमाणम् ॥ ८ ॥

---

१ स्वजातीयेषु । २ कुलीनत्वम् । ३ नवद्वारं नव श्रोत्रादिपञ्च ज्ञानेन्द्रियाणि मनोबुध्यहंकाराः स्थूलशरीरं चेति द्वाराणि विषयग्रहणमार्गायस्मिँस्तत् । ४ शरीरम् । ५ तिस्रः स्थूणाः स्तम्भ इव विधारका यस्य तत् अविद्या, कामः, कर्म चेति । ६ पंच शब्दादयः साक्षिण उदासीना यस्मिँस्तत् । ७ जीवाधिष्ठितम् । ८ ब्रह्मविद् । ९ मद्यादिना । १० विषयासक्तत्वेनानवहितः । ११ धातुदोषादिना । १२ क्रोधः ।

अष्टाविमानि हर्षस्य नवनीतानि भारत ।
वर्तमानानि दृश्यंते तान्येव स्वसुखान्यपि ॥ १०० ॥

समागमश्च सखिभिर्महांश्चैव धनागमः ।
पुत्रेण च परिष्वंगः संनिपातश्च मैथुने ॥ १ ॥

समये च प्रियालापः स्वयूथ्येषु[१] समुन्नतिः ।
अभिप्रेतस्य लाभश्च पूजा च जनसंसदि ॥ २ ॥

अष्टौ गुणाः पुरुषं दीपयंति प्रज्ञा च कौल्यं[२] च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ ३ ॥

नवद्वारं[३]इदं वेश्म[४] त्रिस्थूणं[५] पंचसाक्षिकम्[६] ।
क्षेत्रज्ञा[७]धिष्ठितं विद्वान्यो वेद स परः कविः[८] ॥ ४ ॥

दश धर्मं न जानंति धृतराष्ट्र निबोध तान् ।
मत्तः[९] प्रमत्त[१०] उन्मत्तः[११] श्रांतः क्रुद्धो बुभुक्षितः ॥ ५ ॥

त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश ।
तस्मादेतेषु सर्वेषु न प्रसज्जेत पंडितः ॥ ६ ॥

अत्रैवोदाहरंतीममितिहासं पुरातनम् ।
पुत्रार्थमसुरेंद्रेण गीतं चैव सुधन्वना ॥ ७ ॥

यः काममन्यू[१२] प्रजहाति राजा पात्रे प्रतिष्ठापयते धनं च ।
विशेषविच्छ्रुतवान् क्षिप्रकारी तं सर्वलोकः कुरुते प्रमाणम् ॥८॥

---

१ स्वजातीयेषु । २ कुलीनत्वम् । ३ नवद्वारं नव श्रोत्रादिपञ्च ज्ञानेन्द्रियाणि मनोबुध्यहंकाराः स्थूलशरीरं चेति द्वाराणि विषयग्रहणमार्गा यस्मिँस्तत् । ४ शरीरम् । ५ तिस्रः स्थूणाः स्तम्भ इव विधारका यस्य तत् अविद्या, कामः, कर्म चेति । ६ पंच शब्दादयः साक्षिण उदासीना यस्मिँस्तत् । ७ जीवाधिष्ठितम् । ८ ब्रह्मविद् । ९ मद्यादिना । १० विषयासक्तत्वेनानवहितः । ११ धातुदोषादिना । १२ क्रोधः ।

जानाति विश्वासयितुं मनुष्यान्विज्ञातदोषेषु दधाति दंडम् ।
जानाति मात्रां च तथा क्षमां च तं तादृशं श्रीर्जुषते समग्रा ॥ ९ ॥

सुदुर्बलं नावजानाति कंचिद्युक्तो रिपुं सेवते बुद्धिपूर्वम् ।
न विग्रहं रोचयते बलस्थैः काले च यो विक्रमते स धीरः ॥१०॥

प्राप्यापदं न व्यथते कदाचिदुद्योगमान्विच्छति चाप्रमत्तः ।
दुःखं च काले सहते महात्मा धुरंधरस्तस्य जिताःसपत्नाः ॥११॥

अनर्थकं विप्रवासं गृहेभ्यः पापैः संधिं परदाराभिमर्शम् ।
दंभं स्तैन्यं पैशुनं मद्यपानं न सेवते यश्च सुखी सदैव ॥१२॥

न संरंभेणारभते त्रिवर्गमाकारितःशंसति तत्त्वमेव ।
न मित्रार्थे रोचयते विवादं नापूजितः कुप्यति चाप्यमूढः ॥१३॥

न योऽभ्यसूयत्यनुकंपते च न दुर्बलः प्रातिभाव्यं करोति ।
नात्याह किंचित्क्षमते विवादं सर्वत्र तादृग्लभते प्रशंसाम् ॥१४॥

यो नोद्धतं कुरुते जातु वेषं न पौरुषेणापि विकत्थतेऽन्यान् ।
न मूर्च्छितः कटुकान्याह किंचित्प्रियं सदा तं कुरुते जनो हि ॥ १५ ॥

न वैरमुद्दीपयति प्रशांतं न दर्पमारोहति नास्तमेति ।
न दुर्गतोऽस्मीति करोत्यकार्यं तमार्यशीलं परमाहुरार्याः ॥१६॥

न स्वे सुखे वै कुरुते प्रहर्षं नान्यस्य दुःखे भवति प्रहृष्टः ।
दत्त्वा न पश्चात्कुरुते न तापं स कथ्यते सत्पुरुषार्यशीलः॥१७॥

---

१ अपराधानुसारेण दण्डप्रमाणम् नीलकं० । २ क्रोधेन । ३ धर्मकामार्थान् । ४ आहूतः । ५ प्रातिभाव्यं विरोधम् । ६ अत्याह अतिक्रम्य ब्रवीति ।

देशाचारान्समयान्जातिधर्मान्बुभूषते यः स परोवरज्ञः।
स यत्र तत्राभिगतः सदैव महाजनस्याधिपत्यं करोति ॥१८॥
दंभं मोहं मत्सरं पापकृत्यं राजद्विष्टं पैशुनं पूगवैरम्।
मत्तोन्मत्तैर्दुर्जनैश्चापि वादं यः प्रज्ञावान् वर्जयेत्स प्रधानः॥१९॥
दानं मोहं दैवतं मंगलानि प्रायश्चित्तान्विविधाँल्लोकवादान्।
एतानि यः कुरुते नैत्यकानि तस्योत्थानं देवता राधयंति॥२०॥
समैर्विवाहं कुरुते न हीनैः समैः सख्यं व्यवहारं कथां च।
गुणैर्विशिष्टांश्च पुरो दधाति विपश्चितस्तस्य नयाः सुनीताः॥२१॥
मितं भुंक्ते संविभज्याश्रितेभ्यो मितं स्वपित्यमितं कर्म कृत्वा।
ददात्यमित्रेष्वपि याचितः संस्तमात्मवंतं प्रजहत्यनर्थाः॥२२॥
चिकीर्षितं विप्रकृतं च यस्य नान्ये जनाः कर्म जानंति किंचित्।
मंत्रे गुप्ते सम्यगनुष्ठिते च नाल्पोप्यस्य च्यवते कश्चिदर्थः॥२३॥
यः सर्वभूतप्रशमे निविष्टः सत्यो मृदुर्मानकृच्छुद्धभावः।
अतीव स ज्ञायते ज्ञातिमध्ये महामणिर्जात्य इव प्रसन्नः॥२४॥
य आत्मनाऽपत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत।
अनंततेजाः सुमनाः समाहितः स्वतेजसा सूर्य इवावभासते॥२५॥
वने जातः शापदग्धस्य राज्ञः पांडोः पुत्राः पंच पंचेंद्रकल्पाः
त्वयैव बाला वर्धिताः शिक्षिताश्च तवादेशं पालयंत्यांबिकेय॥२६॥
प्रदायैषामुचितं तात राज्यं सुखी पुत्रैः सहितो मोदमानः।
न देवानां नापि च मानुषाणां भविष्यसि त्वं तर्कणीयो नरेंद्र॥२७॥

इति श्रीमहाभारते उद्योगपर्वणि प्रजागरपर्वणि विदुरनीतिवाक्ये त्रयस्त्रिंशोऽध्यायः॥ ३३॥

---

१ भाषाभेदान्। २ उत्तममध्यमाधमविवेकवान्। ३ समुदायवैरम्। ४ मुख्यः। ५ जात्यः अभिजातः उत्तमे आकरे जात इत्यर्थः नील०। ६ परैरज्ञातेपि स्वव्यलीके आत्मना अपत्रपते लज्जते। ७ शङ्कनीयः।

### धृतराष्ट्र उवाच

जाग्रतो दह्यमानस्य यत्कार्यमनुपश्यसि ।
तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि ॥ १ ॥
त्वं मां यथावद्विदुर प्रशाधि प्रज्ञापूर्वं सर्वमजातशत्रोः ।
यन्मन्यसे पथ्यमदीनसत्त्व श्रेयस्करं ब्रूहि तद्वै कुरूणाम् ॥ २ ॥
पापाशंकी पापमेवानुपश्यन् पृच्छामि त्वां व्याकुलेनात्मनाहम् ।
कवे तन्मे ब्रूहि सर्वं यथावन्मनीषितं सर्वमजातशत्रोः ॥ ३ ॥

### विदुर उवाच

शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् ।
अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥ ४ ॥
तस्माद्वक्ष्यामि ते राजन् हितं यत्स्यात् कुरून्प्रति ।
वचः श्रेयस्करं धर्म्यं ब्रुवतस्तन्निबोध मे ॥ ५ ॥
मिथ्योपेतानि कर्माणि सिध्येयुर्यानि भारत ।
अनुपायप्रयुक्तानि मास्म तेषु मनः कृथाः ॥ ६ ॥
तथैव योगविहितं यत्तु कर्म न सिध्यति ।
उपाययुक्तं मेधावी न तत्र ग्लपयेन्मनः ॥ ७ ॥
अनुबंधानपेक्षेत सानुबंधेषु कर्मसु ।
संप्रधार्य च कुर्वीत न वेगेन समाचरेत् ॥ ८ ॥
अनुबंधं च संप्रेक्ष्य विपाकं चैव कर्मणाम् ।
उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा ॥ ९ ॥

---

१ चिन्ताग्निनेति शेषः नी० । २ उचितं कर्म । ३ महाबल । ४ व्यवहारकुशल । ५ कपटबहूलानिद्यूतादीनि । ६ असदुपाय-प्रयुक्तानि नी० । ७ प्रयोजनानि । ८ निश्चित्य । ९ उद्यमम ।

यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोशे जनपदे[1] दंडे न स राज्येऽवतिष्ठते ॥ १० ॥

यस्त्वेतानि प्रमाणानि यथोक्तान्यनुपश्यति ।
युक्तो धर्मार्थयोर्ज्ञाने स राज्यमधिगच्छति ॥ ११ ॥

न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतम्[2] ।
श्रियं ह्यविनयो हंति जरारूपमिवोत्तमम् ॥ १२ ॥

भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो बडिशमायसम् ।
लोभाभिपाती ग्रसते नानुबंधमवेक्षते ॥ १३ ॥
यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे[3] यत्तदाद्यं भूतिमिच्छता ॥ १४ ॥
वनस्पतेरपक्कानि फलानि प्रचिनोति यः ।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति ॥ १५ ॥
यस्तु पक्कमुपादत्ते काले परिणतं फलम् ।
फलाद्रसं स लभते बीजाच्चैव फलं पुनः ॥ १६ ॥
यथा मधु समादत्ते रक्षन् पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया ॥ १७ ॥
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् ।
मालाकार[4] इवारामे न यथांगारकारकः ॥ १८ ॥
किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः ।
इति कर्माणि संचिंत्य कुर्याद्वा पुरुषो न वा ॥ १९ ॥
अनारभ्या[5] भवंत्यर्थाः केचिन्नित्यं तथाऽगताः[6] ।
कृतः पुरुषकारो[7] हि भवेद्येषु निरर्थकः ॥ २० ॥

---

१ देशे । २ अयोग्यम् । ३ परिपाके । ४ मालिकः । ५ आरब्धुमशक्याः प्रबलैः सह वैरादयः । ६ कचिदप्यप्राप्याः । ७ उद्योगः ।

प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं भर्तारमिच्छंति [1]षंढं पतिमिव स्त्रियः ॥ २१ ॥
कांश्चिदर्थान्नरः प्राज्ञो [2]लघुमूलान्महाफलान् ।
क्षिप्रमारभते कर्तुं न विघ्नयति तादृशान् ॥ २२ ॥
ऋजु पश्यति यः सर्वं [3]चक्षुषानुपिबन्निव ।
आसीनमपि [4]तूष्णीकमनुरज्यंति तं प्रजाः ॥ २३ ॥
[5]सुपुष्पितः [6]स्यादफलः [7]फलितः स्याद्दुरारुहः [8]।
[9]अपक्वः [10]पक्वसंकाशो न तु [11]शीर्येत कर्हिचित् ॥ २४ ॥
चक्षुषा मनसा वाचा [12]कर्मणा च चतुर्विधम् ।
प्रसादयति यो लोकं[13] तं लोकोऽनुप्रसीदति ॥ २५ ॥
यस्मात्त्रस्यंति भूतानि मृगव्याधान्मृगा इव ।
सागरान्तामपि महीं लब्ध्वा स परिहीयते[14] ॥ २६ ॥
पितृपैतामहं राज्यं प्राप्तवान् स्वेन कर्मणा ।
वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः ॥ २७ ॥
धर्ममाचरतो राज्ञः सद्भिश्चरितमादितः ।
वसुधा वसुसंपूर्णा वर्धते भूतिवर्धनी ॥ २८ ॥
अथ संत्यजतो धर्ममधर्मं चानुतिष्ठतः ।
प्रतिसंवेष्टते[15] भूमिरग्नौ चर्माहितं यथा ॥ २९ ॥

---

१ नपुंसकम् । २ अल्पोपायान् । ३ स्नेहं दर्शयन् । ४ तूष्णीम् । ५ अतिप्रसन्नः । ६ धनधान्यादिदानरहितः । ७ धनदानादियोग्योपि । ८ अवश्यः । ९ बलादिरहितः । १० बलवत्ताप्रदर्शकः । ११ नश्येत् । १२ दानेन । १३ भृत्यवर्गम् । १४ परिक्षीयते । १५ संकुचति बहुफलं न प्रयच्छतीति नी० ।

य एव यत्नः क्रियते परराष्ट्रविमर्दने।
स एव यत्नः कर्तव्यः स्वराष्ट्रपरिपालने ॥ ३० ॥

धर्मेण राज्यं विंदेत धर्मेण परिपालयेत् ।
धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ॥ ३१ ॥

अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पतः ।
सर्वतः सारमादद्यादश्मभ्य इव कांचनम् ॥ ३२ ॥

सुव्याहृतानि[1] सूक्तानि सुकृतानि ततस्ततः ।
संचिन्वन् धीर आसीत शिलाहारी[2] शिलं यथा ॥ ३३ ॥

गंधेन गावः पश्यंति वेदैः पश्यंति ब्राह्मणाः ।
चारैः[3] पश्यंति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ३४ ॥

भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा ।
अथ या सुदुहा राजन्नैव तां वितुदंत्यपि ॥ ३५ ॥

यदतप्तं प्रणमति न तत्संतापयंत्यपि ।
यच्च स्वयं नतं दारु न तत्संनमयंत्यपि ॥ ३६ ॥

एतयोपमया धीरः सन्नमेत बलीयसे ।
इंद्राय स प्रणमते नमते यो बलीयसे ॥ ३७ ॥

पर्जन्यनाथाः[4] पशवो राजानो मंत्रिबांधवाः ।
पतयो बांधवाः स्त्रीणां ब्राह्मणा वेदबांधवाः ॥ ३८ ॥

सत्येन रक्ष्यते धर्मो विद्या योगेन[5] रक्ष्यते ।
मृजया[6] रक्ष्यते रूपं कुलं वृत्तेन[7] रक्ष्यते ॥ ३९ ॥

---

१ पाण्डित्यवचनानि मधुरवचनानि वा । २ मुनिः । शिलं कणिशाद्यर्जनम् । 'उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम' यादवः । ३ प्रणिधिभिः । ४ मेघस्वामिकाः । ५ अभ्यासेन । ६ उद्वर्तनेन । ७ आचरणेन ।

मानेन रक्ष्यते धान्यमश्वान् रक्षत्यनुक्रमः ।
अभीक्ष्णदर्शनं गाश्च स्त्रियो रक्ष्याः कुचैलतः ॥ ४० ॥

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अंतेष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ ४१ ॥

य ईर्षुः परवित्तेषु रूपे वीर्ये कुलान्वये ।
सुखसौभाग्यसत्कारे तस्य व्याधिरनंतकः ॥ ४२ ॥

अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।
अकाले मंत्रभेदाच्च येन माद्येन्न तत्पिबेत् ॥ ४३ ॥

विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।
मदा एतेऽवलिप्तानामेत एव सतां दमाः ॥ ४४ ॥

असंतोऽभ्यर्थिताः सद्भिः कचित्कार्ये कदाचन ।
मन्यंते संतमात्मानमसंतमपि विश्रुतम् ॥ ४५ ॥

गतिरात्मवतां संतः संत एव सतां गतिः ।
असतां च गतिः संतो नत्वसंतः सतां गतिः ॥ ४६ ॥

जिता सभा वस्त्रवता मिष्टाशा गोमता जिता ।
अध्वा जितो यानवता सर्वं शीलवता जितम् ॥ ४७ ॥

शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बंधुभिः ॥ ४८ ॥

आढ्यानां मांसपरमं मध्यानां गोरसोत्तरम् ।
तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ ॥ ४९ ॥

---

१ व्यायामशिक्षादिः नी० । २ नीचवंशेषु । ३ इष्टसिद्धेः प्राक् । ४ आश्रयेत् । ५ सहायः । ६ गर्वितानाम् । ७ दुग्धादिसाधनीभूतगोविशिष्टेन ।

संपन्नतरमेवान्नं[1] दरिद्रा भुंजते सदा ।
क्षुत्स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ॥ ९० ॥
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
जीर्यंत्यपि हि काष्ठानि दरिद्राणां महीपते ॥ ९१ ॥
अवृत्तिर्[2]भयमंत्यानां[3] मध्यानां मरणाद्भयम् ।
उत्तमानां तु मर्त्यानामवमानात्परं[4] भयम् ॥ ९२ ॥
ऐश्वर्यमदपापिष्ठा[5] मदाः पानमदादयः ।
ऐश्वर्यमदमत्तो हि नापतित्वा[6] विबुध्यते ॥ ९३ ॥
इंद्रियैरिंद्रियार्थेषु[7] वर्तमानैरनिग्रहैः[8] ।
तैरयं ताप्यते[9] लोको नक्षत्राणि ग्रहैरिव ॥ ९४ ॥
योजितः पंचवर्गेण[10] सहजेनात्मकर्षिणा ।
आपदस्तस्य वर्धंते शुक्लपक्ष इवोडुराट्[11] ॥ ९५ ॥
अविजित्य यथात्मानममात्यान् विजिगीषते ।
अमित्रान्वाजितामात्यः सोऽवशः परिहीयते ॥ ९६ ॥
आत्मानमेव[12] प्रथमं द्वेष्यरूपेण[13] योजयेत् ।
ततोमात्यानमित्रांश्च न मोघं[14] विजिगीषते ॥ ९७ ॥
वश्येंद्रियं जितात्मानं धृतदंडं विकारिषु[15] ।
परीक्ष्य कारिणं धीरमत्यंतं श्रीर्निषेवते ॥ ९८ ॥

---

१ अतिशयेन स्वादु। २ जाविकाराहित्यं। ३ अधमानाम्। ४ एव। ५ ऐश्वर्यमदः पापिष्ठो निन्दिततमो येभ्यस्ते पानमदादयो मदाः नी०। ६ ऐश्वर्यादभ्रंशित्वा। ७ विषयेषु। ८ अवशैः। ९ आक्रमोऽत्र तापनम्। १० श्रोत्रादिपञ्चज्ञानेन्द्रियगणेन। ११ उडुषु नक्षत्रेषु राजते इति उडुराट् चन्द्रः। १२ मनः। १३ शत्रुरूपेण। १४ निष्फलम्। १५ अपराधिषु।

रथः शरीरं पुरुषस्य राजन्नात्मा नियंतेंद्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तः कुशली सदश्वैर्दांतैः सुखं याति रथीव धीरः ॥ ५९ ॥

एतान्यनिगृहीतानि व्यापादयितुमप्यलम् ।
अविधेयां इवादांतां हयाः पथि कुसारथिम् ॥ ६० ॥

अनर्थमर्थतः पश्यन्नर्थं चैवाप्यनर्थतः ।
इंद्रियैरजितैर्बालः सुदुःखं मन्यते सुखम् ॥ ६१ ॥

धर्मार्थौ यः परित्यज्य स्यादिंद्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ ६२ ॥

अर्थानामीश्वरो यः स्यादिंद्रियाणामनीश्वरः ।
इंद्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः ॥ ६३ ॥

आत्मनात्मानमन्विच्छेन्मनोबुद्धींद्रियैर्यतैः ।
आत्माह्येवात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ६४ ॥

बंधुरात्मात्मनस्तस्य येनैवात्मात्मना जितः ।
स एव नियतो बंधुः स एव नियतो रिपुः ॥ ६५ ॥

क्षुद्राक्षेणेव जालेन झषावपिहितावुरू ।
कामश्च राजन् क्रोधश्च तौ प्रज्ञानं विलुंपतः ॥ ६६ ॥

समवेक्ष्येह धर्मार्थौ संभारान् योऽधिगच्छति ।
स वै संभृतसंभारः सततं सुखमेधते ॥ ६७ ॥

---

१ सारथिः । २ वशीकृतैः । ३ नाशयितुम् । ४ उद्दण्डाः 'विधेयो विनयग्राही' ति कोशात् अशिक्षिता इति यावत् । ५ अपायः । ६ बुद्धया । ७ प्रत्यक्चैतन्यरूपम् । ८ वशीकृतैः । ९ सूक्ष्मविवरेण १० आनायेन मत्स्यबन्धनसाधनेन । ११ आच्छादितौ । १२ महान्तौ । १३ अनुरुध्य । १४ जयसाधनानि नी० ।

यः पंचाभ्यंतरान् शत्रूनविजित्य मनोमयान् ।
जिगीषति रिपूनन्यान् रिपवोऽभिभवंति तम् ॥ ६८ ॥
दृश्यंते हि महात्मानो बध्यमानाः स्वकर्मभिः ।
इंद्रियाणामनीशत्वाद्राजानोराज्यविभ्रमैः ॥ ६९ ॥
असंत्यागात् पापकृतामपापांस्तुल्यो दंडः स्पृशते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावात्तस्मात्पापैः सह संधिं न कुर्यात् ।७०।
निजानुत्पततः शत्रून्पंच पंचप्रयोजनान् ।
यो मोहान्न निगृह्णाति तमापद्ग्रसते नरम् ॥ ७१ ॥
अनसूयार्जवं शौचं संतोषः प्रियवादिता ।
दमः सत्यमनायासो न भवंति दुरात्मनाम् ॥ ७२ ॥
आत्मज्ञानमनायासस्तितिक्षा धर्मनित्यता ।
वाक्चैव गुप्ता दानं च नैतान्यंत्येषु भारत ॥ ७३ ॥
आक्रोशपरिवादाभ्यां विहिंसंत्यबुधा बुधान् ।
वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥ ७४ ॥
हिंसा बलमसाधूनां राज्ञां दंडविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ॥ ७५ ॥
वाक्संयमो हि नृपते सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहु भाषितुम् ॥ ७६ ॥
अभ्यावहति कल्याणं विविधं वाक् सुभाषिता ।
सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥ ७७ ॥

---

१ 'तत्संसर्गी च पञ्चम' इति स्मृतेः । महापातकिसंसर्गिणोपि पातकित्वम् । तथा च दुर्योधनादयो हि पातकिनोऽतस्तत्संसर्गात्त्वमपिपातकीस्यास्तस्मात्तत्त्यागे यत्नो विधेय इति भावः । २ ज्ञानेन्द्रियाणि । ३ शब्दादयो विषयाः । ४ आक्षेपः । ५ निन्दा । ६ सेवा । ७ उत्पादयति ।

रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं[1] न संरोहति वाक्क्षतम् ॥ ७८ ॥
कर्णि[2]नालीक[3]नाराचा[4]न्निर्हरंति[5] शरीरतः ।
वाक्शल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ॥ ७९ ॥
वाक्सायका वदनान्निष्पतंति यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु[6] ते पतंति तान्पंडितो नावसृजेत्परेभ्यः ॥ ८० ॥
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षंति सोऽवाचीनानि[7] पश्यति ॥ ८१ ॥
बुद्धौ कलुषभूतायां[8] विनाशे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ ८२ ॥
सेयं बुद्धिः परीता[9] ते पुत्राणां भरतर्षभ ।
पांडवानां विरोधेन न चैनानवबुध्यसे ॥ ८३ ॥
राजा लक्षणसम्पन्नस्त्रैलोक्यस्यापि यो भवेत् ।
शिष्यस्ते शासिता[10] सोऽस्तु धृतराष्ट्र युधिष्ठिरः ॥ ८४ ॥
अतीव सर्वान्पुत्रांस्ते भागधेयपुरस्कृतः ।
तेजसा प्रज्ञया चैव युक्तो धर्मार्थतत्त्ववित् ॥ ८५ ॥
अनुक्रोशादानृशंस्याद्योऽसौ धर्मभृतां वरः ।
गौरवात्तव राजेन्द्र बहून्क्लेशांस्तितिक्षति[11] ॥ ८६ ॥

इति श्रीमहाभारते उद्योगपर्वणि प्रजागरपर्वणि विदुरनीतिवाक्ये चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

---

१ निन्दितम् । २ कर्णी कर्णाकृतिफलको बाणः । ३ नालीकः नलीकया प्रक्षेप्यो बाणः । ४ नाराचः लोहमयो बाणः । ५ निष्कासयन्ति । ६ नामर्मसु किं तु मर्मस्वेव नी० । ७ नीचकर्माणि नी० । ८ मलिनीभूतायाम् । ९ विपरीता । १० नियन्ता स्वामीति यावत् । ११ परस्मैपदमार्षम् ।

### धृतराष्ट्र उवाच

ब्रूहि भूयो महाबुद्धे धर्मार्थसहितं वचः ।
शृण्वतो नास्ति मे तृप्तिर्विचित्राणीह भाषसे ॥ १ ॥

### विदुर उवाच

सर्वतीर्थेषु वा स्नानं सर्वभूतेषु चार्जवम्[1] ।
उभे त्वेते समे स्यातामार्जवं वा विशिष्यते ॥ २ ॥

आर्जवं प्रतिपद्यस्व पुत्रेषु सततं विभो ।
इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ॥ ३ ॥

यावत्कीर्तिर्मनुष्यस्य पुण्या लोके प्रगीयते ।
तावत्स पुरुषव्याघ्र स्वर्गलोके महीयते[2] ॥ ४ ॥

अत्राप्युदाहरंतीममितिहासं पुरातनम् ।
विरोचनस्य संवादं केशिन्यर्थे सुधन्वना ॥ ५ ॥

स्वयंवरे स्थिता कन्या केशिनी नाम नामतः ।
रूपेणाप्रतिमा[3] राजन् विशिष्टपतिकाम्यया[4] ॥ ६ ॥

विरोचनोथ दैतेयस्[5]तदा तत्राजगाम ह ।
प्राप्तुमिच्छंस्ततस्तत्र दैत्येंद्रं प्राह केशिनी ॥ ७ ॥

### केशिन्युवाच ।

किं ब्राह्मणाः स्विच्छ्रेयांसो दितिजाः स्विद्विरोचन ।
अथ केन स्म पर्यंकं सुधन्वा[6] नाधिरोहति ॥ ८ ॥

---

१ ऋजोर्भाव आर्जवमवैषम्यम् । २ पूज्यते । ३ अनुपमा ।
४ शौर्यौदार्यसौमनस्यादिगुणगणसहितपतिप्राप्तीच्छया । ५ दैत्यः ।
६ अयं ब्राह्मण आसीत् ।

विरोचन उवाच

प्रा[1]जापत्यास्तु वै श्रेष्ठा वयं केशिनि सत्तमाः ।
अस्माकं खल्विमे लोकाः के देवाः के द्विजातयः ॥ ९ ॥

केशिन्युवाच ।

इहैवावां प्रतीक्षाव उपस्था[2]ने विरोचन ।
सुधन्वा प्रातरागन्ता पश्येयं वां[3] समागतौ ॥ १० ॥

विरोचन उवाच

तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
सुधन्वानं च मां चैव प्रातर्द्रष्टासि संगतौ ॥ ११ ॥

विदुर उवाच

अतीतायां च शर्वर्यामुदिते सूर्यमंडले ।
अथाजगाम तं देशं सुधन्वा राजसत्तम ।
विरोचनो यत्र विभो केशिन्या सहितः स्थितः ॥ १२ ॥

सुधन्वा च समागच्छत्प्राऱ्हादिं केशिनीं तथा ।
समागतं द्विजं दृष्ट्वा केशिनी भरतर्षभ ।
प्रत्युत्थायासनं तस्मै पाद्यमर्घ्यं ददौ पुनः ॥ १३ ॥

सुधन्वोवाच ।

अन्वा[5]लभे हिरण्मयं प्राऱ्हादे ते वरासनम् ।
एक[6]त्वमुपसंपन्नो न त्वा[7]सेऽहं त्वया सह ॥ १४ ॥

---

१ प्रजापतेः कश्यपस्यापत्यानि पुमांसः प्राजापत्या दैत्या इत्यर्थः । २ उपस्थातुम् । ३ दैत्यब्राह्मणौ । ४ विरोचनम् । ५ स्पृशामि । ६ त्वया सह साम्यम् । ७ उपविशामि ।

विरोचन उवाच ।

तवार्हते तु फलकं कूर्चं वाप्यथवा बृसी ।
सुधन्वन्नत्वमर्होसि मया सह समासनम् ॥ १५ ॥

सुधन्वोवाच ।

पितापुत्रौ सहासीतां द्वौ विप्रौ क्षत्रियावपि ।
वृद्धौ वैश्यो च शूद्रौ च न त्वन्यावितरेतरम् ॥ १६ ॥
पिता हि ते समासीनमुपासीतैव मामधः ।
बालः सुखैधितो गेहे न त्वं किंचन बुध्यसे ॥ १७ ॥

विरोचन उवाच ।

हिरण्यं च गवाश्वं च यद्वित्तमसुरेषु नः ।
सुधन्वन्विपणे तेन प्रश्नं पृच्छाव ये विदुः ॥ १८ ॥

सुधन्वोवाच ।

हिरण्यं च गवाश्वं च तवैवास्तु विरोचन ।
प्राणयोस्तु पणं कृत्वा प्रश्नं पृच्छाव ये विदुः ॥ १९ ॥

विरोचन उवाच ।

आवां कुत्र गमिष्यावः प्राणयोर्विपणे कृते ।
न तु देवेष्वहं स्थाता न मनुष्येषु कर्हिचित् ॥ २० ॥

सुधन्वोवाच ।

पितरं ते गमिष्यावः प्राणयोर्विपणे कृते ।
पुत्रस्यापि स हेतोर्हि प्रह्लादो नानृतं वदेत् ॥ २१ ॥

---

१ काष्ठपीठम् । २ वर्तितदर्भमयमासनम् 'मुनीनामासनम बृसी' । ३ आसीयाताम् । ४ सेवते । ५ अधः स्थित्वेति शेषः । ६ गावश्चाश्वाश्चेति समाहारः । ७ आवयोः कः श्रेष्ठ इति । ८ ग्लहं । ९ ग्लहे ।

**विदुर उवाच ।**

एवं कृतपणौ क्रुद्धौ तत्राभिजग्मतुस्तदा ।
विरोचनसुधन्वानौ प्रह्लादो यत्र तिष्ठति ॥ २२ ॥

**प्रह्लाद उवाच ।**

इमौ तौ संप्रदृश्येते याभ्यां न चरितं[1] सह ।
आशीविषाविव[2] क्रुद्धावेकमार्गाविहागतौ ॥ २३ ॥
किं वै सहैवं चरथो न पुरा चरथः सह ।
विरोचनैतत्पृच्छामि किं ते सख्यं सुधन्वना ॥ २४ ॥

**विरोचन उवाच ।**

न मे सुधन्वना सख्यं प्राणयोर्विपणावहे[3] ।
प्रह्लाद तत्त्वं पृच्छामि मा प्रश्नमनृतं वदेः ॥ २५ ॥

**प्रह्लाद उवाच ।**

उदकं मधुपर्कं वाप्यानयन्तु सुधन्वने ।
ब्रह्मन्नभ्यर्चनीयोऽसि[4] श्वेता गौः पीवरी कृता[5] ॥ २६ ॥

**सुधन्वोवाच ।**

उदकं मधुपर्कं च पथिष्वेवार्पितं मम ।
प्रह्लाद त्वं तु मे तथ्यं[6] प्रश्नं प्रब्रूहि पृच्छतः ।
किं ब्राह्मणाः स्विच्छ्रेयांस उताहो स्विद्विरोचनः ॥ २७ ॥

**प्रह्लाद उवाच ।**

पुत्र एको मम ब्रह्मंस्त्वं च साक्षादिहास्थितः ।
तयोर्विवदतोः प्रश्नं कथमस्मद्विधो वदेत् ॥ २८ ॥

---

१ गमनम् । २ सर्पौ । ३ परस्परं ग्लहं कुर्वहे । ४ पूज्य । ५ मधुपर्कार्थमुपकल्पिता । ६ सत्यम् ।

सुधन्वोवाच ।

गां प्रदद्यास्त्वौरसाय यद्वान्यत्स्यात्प्रियं धनम् ।
द्वयोर्विवदतोस्तथ्यं वाच्यं च मतिमंस्त्वया ॥ २९ ॥

प्रल्हाद उवाच ।

अथ यो नैव प्रब्रूयात्सत्यं वा यदि वानृतम् ।
एतत्सुधन्वन्पृच्छामि दु[1]र्विवक्ता स्म किं[2] वसेत् ॥ ३० ॥

सुधन्वोवाच ।

यां रात्रि[3]मधिविन्ना[4] स्त्री यां चैवाक्ष[5]पराजितः ।
यां च भाराभितप्तांगो दुर्विवक्ता स्म तां[6] वसेत् ॥ ३१ ॥
नगरे[7] प्रतिरुद्धः सन् बहिर्द्वारे बुभुक्षितः ।
अमित्रान् भूयसः पश्येद्यः साक्ष्यमनृतं वदेत् ॥ ३२ ॥
पञ्च[8] पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ ३३ ॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।
सर्वं भूम्यनृते हन्ति मास्म भूम्य[9]नृतं वदेः ॥ ३४ ॥

प्रल्हाद उवाच ।

मत्तः श्रेयानंगिरा[10] वै सुधन्वा त्वद्विरोचन ।
माताऽस्य श्रेयसी मातुस्तस्मात्त्वं तेन वै जितः ॥ ३५ ॥

---

१ अन्याय्यवक्ता । २ किं दुःखं प्राप्नुयात् । ३ अत्यन्तसंयोगे द्वितीया । ४ कृतसपत्नीका स्त्री नी० । ५ द्यूतहृतसर्वस्वः । ६ अधिविन्नादयो यादृशं दुःखं प्रायुप्नुस्तादृशं दुःखमनृतवादी प्राप्नुयात् । ७ कारागारादौ च । ८ पूर्वजान्पुरुषान्पञ्च हन्ति अत्र हननं पातनं तच्च परलोकादेवमुत्तरत्रानुसंधेयम् । ९ भूमितुल्या केशिनी तदर्थमनृतम् । १० सुधन्वनः पिता ।

विरोचन सुधन्वायं प्राणानामीश्वरस्तव ।
सुधन्वन्पुनरिच्छामि त्वया दत्तं विरोचनम् ॥ ३६ ॥

**सुधन्वोवाच ।**

यद्धर्ममवृणीथास्त्वं न कामादनृतं वदीः[1] ।
पुनर्ददामि ते पुत्रं तस्मात्प्रऱ्हाद दुर्लभम् ॥ ३७ ॥
एष प्रऱ्हाद पुत्रस्ते मया दत्तो विरोचनः ।
पादप्रक्षालनं कुर्यात्कुमार्याः संनिधौ मम ॥ ३८ ॥

**विदुर उवाच ।**

तस्माद्राजेन्द्र भूम्यर्थे नानृतं वक्तुमर्हसि ।
मागमः ससुतामात्यो नाशं पुत्रार्थमब्रुवन्[2] ॥ ३९ ॥
न देवा दण्डमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संविभजंति[3] तम् ॥ ४० ॥
यथा यथा हि पुरुषः कल्याणे कुरुते मनः ।
तथा तथास्य सर्वार्थाः सिध्यन्ते नात्र संशयः ॥ ४१ ॥
नैनं छंदांसि[4] वृजिनात्[5]तारयन्ति मायाविनं मायया वर्तमानम् ।
नीडं[6] शकुन्ता इव जातपक्षाश्छन्दांस्येनं प्रजहत्यन्तकाले ॥४२॥
मद्यपानं कलहं पूगवैरं भार्यापत्योरन्तरं[7] ज्ञातिभेदम् ।
राजद्विष्टं स्त्रीपुंसयोर्विवादं[8] वर्ज्यान्याहुर्यश्च पंथाः प्रदुष्टः ॥ ४३ ॥
सामुद्रिकं[9] वणिजं[10] चोरपूर्वं शलाकधूर्तं[11] च चिकित्सकं च ।
अरिं च मित्रं च कुशीलवं[12] च नैतान्साक्ष्ये त्वधिकुर्वीत सप्त ॥४४॥

---

१ अडभाववृद्ध्यभावावार्षौ । २ सत्यमितिशेषः । अनेन प्रकृते आख्यायिकोपयोगो दर्शितः । ३ वर्धयन्ति । ४ वेदाः । ५ पापात् दुःखाद्वा । ६ कुलायम् । ७ वियोगम् । ८ वैरप्रवर्तनम् । ९ हस्तदेखादिपरीक्षकं नी० । १० पूर्वं चौरः पश्चाद्वणिग्भूतः । न्यूनतुलोपलादिना व्यवहर्त्ता वा । ११ अक्षशलाकादिना विश्वस्तान्यो वञ्चयति । १२ कुत्सितं शीलं वाद्यनुसरतियस्तं नटादिकं वा ।

मा[1]नाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः ।
एतानि चत्वार्यभयंकराणि भयं प्रयच्छन्त्ययथाकृतानि ॥ ४५ ॥

अगारदाही गरदः कुंडा[2]शी सोमविक्रयी ।
पर्वका[3]रश्च सूची[4] च मित्रध्रुक् पारदारिकः ॥ ४६ ॥

भ्रूणहा गुरुतल्पी च यश्च स्यात्पानपो द्विजः ।
अतितीक्ष्णश्च काक[5]श्च नास्तिको वेदनिंदकः ॥ ४७ ॥

स्रुवप्रग्रहणो[6] व्रात्य[7]ः कीनाश[8]श्चात्मवा[9]नपि ।
रक्षेत्युक्तश्च यो हिंस्यात् सर्वे ब्रह्महभिः समाः ॥ ४८ ॥

तृणोल्कया[10] ज्ञायते जातरूपं[11] वृत्तेन भद्रो[12] व्यवहारेण साधुः ।
शूरो भयेष्वर्थकृच्छ्रेषु धीरः कृच्छ्रेष्वापत्सु सुहृदश्चारयश्च ॥ ४९ ॥

जरा रूपं हरति हि धैर्यमाशा मृत्युः प्राणान्धर्मचर्यामसूया ।
क्रोधः श्रियं शीलमनार्यसेवा ह्रियं कामः सर्वमेवाभिमानः ॥ ५० ॥

श्रीर्मंगलात्प्रभवति प्रागल्भ्यात्संप्रवर्धते ।
दाक्ष्यात्तु कुरुते मूलं संयमात्प्रतितिष्ठति ॥ ५१ ॥

अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं[13] च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ ५२ ॥

---

१ मानोलोकेषूत्कर्षस्तदर्थमग्निहोत्रादिकं यस्य । २ भगभक्षः जीवति भर्त्तरि जारादुत्पन्नः कुंडः तेन निमित्तेनाशितुं शीलं सः नी० । ३ शस्त्रकारः । ४ नक्षत्रसूची पिशुनो वा । ५ क्षतोद्वर्तनेन काकवत् दुखितस्यापि दुःखप्रदः नी० । ६ राजकीयवृत्तिबलेन सर्वेभ्यो वणिग्भ्यः स्रुवेण धान्यादिकमादत्ते । ग्रामपुरोहितो वा । ७ अतीतोपनयनकालो द्विजः । ८ कर्षकः कृपणो वा । ९ समर्थोऽपि यो रक्षेत्युक्तो हिंस्यात् । १० तृणज्वालया । ११ रूपवद्वस्तु । १२ वृषो धर्म इति यावत । १३ कुलीनता ।

एतान्गुणांस्तात महानुभावानेको गुणः संश्रयते प्रसह्य ।
राजा यदा सत्कुरुते मनुष्यं सर्वान्गुणानेषं[1] गुणो विभाति[2] ॥ ९३ ॥

अष्टौ नृपेमानि मनुष्यलोके स्वर्गस्य लोकस्य निदर्शनानि ।
चत्वार्येषामन्ववेतानि[3] सद्भिश्चत्वारि चैषामनुयान्ति सन्तः ॥ ९४ ॥

यज्ञो[4] दानमध्ययनं तपश्च चत्वार्येतान्यन्ववेतानि सद्भिः ।
दमः सत्यमार्जवमानृशंस्यं चत्वार्येतान्यनुयान्ति सन्तः ॥ ९५ ॥

इज्याध्ययनदानानि तपः सत्यं क्षमा घृणा ।
अलोभ इति मार्गोऽयंधर्मस्याष्टविधः स्मृतः ॥ ९६ ॥

तत्र पूर्वचतुर्वर्गो दम्भार्थमपि[5] सेव्यते ।
उत्तरश्च चतुर्वर्गो नामहात्मसु तिष्ठति ॥ ९७ ॥

न सा सभा यत्र न सन्ति वृद्धा न ते वृद्धा ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र न सत्यमस्ति न तत्सत्यं यच्छलेनाभ्युपेतम्[6] ॥ ९८ ॥

सत्यं रूपं[7] श्रुतं[8] विद्या कौल्यं शीलं बलं धनम् ।
शौर्यं च चित्रभाष्यं[9] च दशेमे[10] स्वर्गयोनयः ॥ ९९ ॥

पापं कुर्वन्पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन्पुण्यकीर्तिः पुण्यमत्यंतमश्नुते ॥ ६० ॥

तस्मात्पापं न कुर्वीत पुरुषः शंसितव्रतः ।
पापं प्रज्ञां नाशयति क्रियमाणं पुनःपुनः ॥ ६१ ॥
नष्टप्रज्ञः पापमेव नित्यमारभते नरः ।
पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनःपुनः ॥ ६२ ॥

---

१ राजकृतसत्काररूपः । २ विभूषयति । ३ नित्यबद्धानि । ४ यज्ञः । ५ परप्रतारणार्थं धर्माचरणम् । ६ सहितम् । ७ विनयमुद्रा । ८ शास्त्राध्ययनम् । ९ युक्तियुक्तं वचनं । १० दश संसर्गजा गुणा इति पाठांतरम् ।

वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः ।
पुण्यं कुर्वन्पुण्यकीर्तिः पुण्यं स्थानं स्म गच्छति ।
तस्मात्पुण्यं निषेवेत पुरुषः सुसमाहितः ॥ ६३ ॥
असूयको दंदशूको[1] निष्ठुरो[2] वैरकृच्छठः ।
स कृच्छ्रं महदाप्नोति नचिरात्[3]पापमाचरन् ॥ ६४ ॥
अनसूयुः कृतप्रज्ञः शोभनान्याचरन्सदा ।
नकृच्छ्रं महदाप्नोति सर्वत्र च विरोचते ॥ ६५ ॥
प्रज्ञामेवावगमयति यः प्राज्ञेभ्यः स पण्डितः ।
प्राज्ञो ह्यवाप्य धर्मार्थौ शक्नोति सुखमेधितुम्[4] ॥ ६६ ॥
दिवसेनैव तत्कुर्याद्येन रात्रौ सुखं वसेत् ।
अष्टमासेन तत्कुर्याद्येन वर्षाः[5] सुखं वसेत् ॥ ६७ ॥
पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ।
यावज्जीवेन तत्कुर्याद्येन प्रेत्य सुखं वसेत् ॥ ६८ ॥
जीर्णमन्नं प्रशंसन्ति भार्यां च गतयौवनाम् ।
शूरं विजितसंग्रामं गतपारं[6] तपस्विनम् ॥ ६९ ॥
धनेनाधर्मलब्धेन यच्छिद्रमपिधीयते ।
असंवृतं तद्भवति ततोऽन्यदवदीर्यते ॥ ७० ॥
गुरुरात्मवतां[7] शास्ता शास्ता राजा दुरात्मनाम् ।
अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ७१ ॥

---

१ दन्दशूकाः सर्पाः मर्मोपघातकत्वेन क्रोधादिना च सर्पत्वारोपः । २ कठोरभाषी । ३ शीघ्रम् । ४ समस्तं पदं सुखवाचीति नी० । ५ वर्षा इत्यत्यन्तसंयोगे द्वितीयेति नी० । ६ प्राप्ततत्त्वम् । ७ आत्मवतां जितचित्तानामिति नी० ।

ऋषीणां च नदीनां च कुलानां च महात्मनाम् ।
प्रभवो[1] नाधिगन्तव्यः[2] स्त्रीणां दुश्चरितस्य च ॥ ७२ ॥

द्विजातिपूजाभिरतो दाता ज्ञातिषु चार्जवी ।
क्षत्रियः शीलभाग्राजंश्चिरं पालयते महीम् ॥ ७३ ॥

सुवर्णपुष्पां पृथिवीं चिन्वंति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥ ७४ ॥

बुद्धिश्रेष्ठानि[3] कर्माणि बाहुमध्यानि भारत ।
तानि जंघाजघन्यानि भारप्रत्यवराणि च ॥ ७५ ॥

दुर्योधनेऽथ शकुनौ मूढे दुःशासने तथा ।
कर्णे चैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि ॥ ७६ ॥

सर्वैर्गुणैरुपेतास्तु पाण्डवा भरतर्षभ ।
पितृवत्[4] त्वयि वर्तन्ते तेषु वर्तस्व पुत्रवत् ॥ ७७ ॥

इति श्रीमहाभारते उद्योगपर्वणि प्रजागरपर्वणि विदुराहितवाक्ये पंचत्रिंशोऽध्यायः ॥ ३५ ॥

---

## विदुर उवाच ।

अत्रैवोदाहरंतीममितिहासं पुरातनम् ।
आत्रेयस्य[5] च संवादं साध्यानां[6] चेति नः श्रुतम् ॥ १ ॥

---

१ माहात्म्यं 'प्रभवो जन्ममूले स्याज्जन्महेतौ पराक्रमे' इति मेदिनी । २ नाधिगन्तुं शक्यः अनन्तत्वात् । ३ बुद्धिबलेन साध्यानि श्रेष्ठानि । बाहुबलेन साध्यानि मध्यमानि जङ्घाशब्देन गोप्यत्वं तेन कपटादिसाध्यानि कर्माणि नीचानि । भारः संकटं तेन साध्यानि अतिनीचानि । ४ यथा युधिष्ठिरादयस्त्वयि पितृबुद्ध्या वर्तन्ते तथा तेषु त्वया ममेमे पुत्रा इति मत्वा वर्तितव्यमिति भावः । ५ दत्तात्रेयस्य । ६ देवविशेषाणाम् ।

चरंतं हंसरूपेण[1] महर्षिं संशितव्रतम् ।
साध्या देवा महाप्राज्ञं पर्यपृच्छन्त वै पुरा ॥ २ ॥

साध्या ऊचुः ।

साध्या देवा वयमेते महर्षे दृष्ट्वा भवन्तं न शक्नुमोऽनुमातुम्[2] ।
श्रुतेन धीरो बुद्धिमाँस्त्वं मतो नः काव्यां[3] वाचं वक्तुमर्हस्युदाराम् ॥३॥

हंस उवाच ।

एतत्कार्यममराः संश्रुतं मे धृतिः शमः सत्यधर्मानुवृत्तिः ।
ग्रंथिं[4] विनीय[5] हृदयस्य सर्वं प्रियाप्रिये चात्मसमं नयीत[6] ॥ ४ ॥

आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विंदति ॥ ५ ॥

नाक्रोशी स्यान्नावमानी परस्य मित्रद्रोही नोत नीचोपसेवी ।
न चाभिमानी न च हीनवृत्तो रूक्षां[7] वाचं रुषतीं[8] वर्जयीत ॥६॥

मर्माण्यस्थीनि हृदयं तथासून् रूक्षा वाचो निर्दहंतीह पुंसाम् ।
तस्माद्वाचमुषतीमुग्ररूपां धर्मारामो नित्यशो वर्जयीत ॥ ७ ॥

अरुंतुदं परुषं रूक्षवाचं वाक्कण्टकैर्वितुदन्तं[10] मनुष्यान् ।
विद्यादलक्ष्मीकतमं जनानां मुखे निबद्धां निर्ऋतिं[11] वै वहन्तम् ॥८॥

परश्चेदेनमभिविध्येत बाणैर्भृशं सुतीक्ष्णैरनलार्कदीप्तैः ।
स विध्यमानोऽप्यतिदह्यमानो[9] विद्यात्कविः सुकृतं मे दधाति[12] ॥९॥

---

१ परमहंसरूपेण । २ लिङ्गेन अनुमानं कर्त्तुम् । ३ विद्वत्त्वबोधिकाम् । ४ अहंताममतारूपं चिज्जडयोरात्मान्तःकरणयोरेकलोलीभावं वा । ५ विनीय दुरीकृत्य । ६ पश्येत् । ७ परुषाम । ८ रोषवतीम् । ९ दाहिकाम् । १० पीडयन्तम् । ११ अलक्ष्मीं मृत्युं वा । १२ पुण्णाति ।

यदि सन्तं सेवति यद्यसन्तं तपस्विनं यदि वा स्तेनमेव ।
वासो यथा रंगवशं प्रयाति तथा स तेषां वशमभ्युपैति ॥ १० ॥
अति[1]वादं न प्रवदेन्न वादयेद्यो नाह[2]तः प्रतिहन्यान्न घातयेत् ।
हन्तुं च यो नेच्छति पापकं[3] वै तस्मै देवाः स्पृहयन्त्यागताय ॥ ११ ॥
अ[4]व्याहृतं व्याहृताच्छ्रेय आहुः सत्यं वदेद्व्याहृतं तद्द्वितीयम् ।
प्रियं वदेद्व्याहृतं तत्तृतीयं धर्म्यं वदेद्व्याहृतं तच्चतुर्थम् ॥ १२ ॥
यादृशैः संनिविशते यादृशांश्चोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥ १३ ॥
यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥ १४ ॥
न जीयते चानुजिगीषतेन्यान्न वैरकृच्चाप्रतिघातकश्च ।
निंदाप्रशंसासु समस्वभावो न शोचते हृष्यति नैव चायम् ॥ १५ ॥
भावमिच्छति सर्वस्य नाभावे कुरुते मनः ।
सत्यवादी मृदुर्दान्तो यः स उत्तमपूरुषः ॥ १६ ॥
नान[5]र्थकं सान्त्वयति प्रतिज्ञाय ददाति च ।
रन्ध्रं परस्य जानाति यः स मध्यमपूरुषः ॥ १७ ॥
दुःशा[6]सनस्तूपहतोभिशस्तो नावर्तते मन्युशात्कृतघ्नः ।
न कस्यचिन्मित्त्रमथो दुरात्मा कलाश्चैता अधमस्येह पुंसः ॥ १८ ॥

---

१ प्रोक्तोप्यतिवादं स्वयं न वदेद्वादयेद्वा । २ आहतोपि न प्रतिहन्यान्नवा घातयेत् । ३ पापकर्तारम् । ४ अव्याहृतं मौनं श्रेयः ततोपि सत्यवचनं श्रेष्ठं सत्यमपि प्रियं चेत्ततोपि श्रेष्ठं तदपि धर्मादनपेतं तच्छ्रेष्ठतममित्यर्थः नी० । ५ वाङ्मात्रेणैव न पदार्थादिना । ६ घोषयात्रादौ गंधर्वैः शस्त्रहतो बध्वा स्वस्थानं नीयमानः पाण्डवैर्मोचितोपि न तेषामुपकारं मन्यते प्रत्युत विरुणद्धि तस्मात्स नीचतम इति भावः ।

न श्रद्दधाति कल्याणं परेभ्योप्यात्म[1]शंकितः ।
निरा[2]करोति मित्त्राणि यो वै सोऽधमपूरुषः ॥ १९ ॥
उत्तममानेव सेवेत प्राप्तकाले तु मध्यमान् ।
अधमाँस्तु न सेवेत य इच्छेद्भूतिमात्मनः ॥ २० ॥
प्राप्नोति वैचित्तमसद्बलेन नित्योत्थानात्प्रज्ञया पौरुषेण ।
न त्वेव सम्यग्लभते प्रशंसां न वृत्तमाप्नोति महाकुलानाम् ॥२१॥

धृतराष्ट्र उवाच ।

महाकुलेभ्यः स्पृहयन्ति देवा धर्मार्थनित्याश्च बहुश्रुताश्च ।
पृच्छामि त्वां विदुर प्रश्नमेतं भवन्ति वै कानि महाकुलानि ॥२२॥

विदुर उवाच ।

तपो दमो ब्रह्म[3]वित्तं विता[4]नाः पुण्या विवाहाः सततान्नदानम् ।
येष्वेवैते सप्त गुणा वसन्ति सम्यग्वृ[5]त्तास्तानि महाकुलानि ॥२३॥
येषां न वृत्तं व्य[6]थते न योनि[7]श्चित्तप्रसादेन चरन्ति धर्मम् ।
ये कीर्तिमिच्छन्ति कुले विशिष्टां त्यक्तानृतास्तानि महाकुलानि ॥
अनिज्यया कुविवाहैर्वेदस्योत्सादनेन च ।
कुलान्यकुलतां यान्ति धर्मस्यातिक्रमेण च ॥ २५ ॥
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ २६ ॥

---

१ विश्वासरहितः । २ दूरीकरोति । ३ ब्रह्मणो ब्राह्मणस्य वित्तं धनं पठनपाठनादिद्रव्यम् । ४ यज्ञाः । ५ सुस्थिराः । ६ चलति । ७ पित्रादयः येषामाचरणेन व्यथन्ते किंतु गुणैस्तुष्यन्तीति नील० । यत्तु कैश्चिद्व्याख्यातं योनिः पित्रादिः येषां वृत्तं वृत्तेन न व्यथते परं गुणैस्तुष्यत्येवेति तदयुक्तम् । नद्वयमनन्वितं भवति तस्मादस्मदुक्तं न्याय्यम ।

ब्राह्मणानां परिभवात्परिवादाच्च भारत ।
कुलान्यकुलतां यान्ति न्यासा[1]पहरणेन च ॥ २७ ॥
कुलानि समुपेतानि गोभिः पुरुषतोऽर्थतः ।
कुलसंख्यां न गच्छन्ति यानि हीनानि वृत्ततः ॥ २८ ॥
वृत्ततस्त्वविहीनानि कुलान्यल्पधनान्यपि ।
कुलसंख्यां च गच्छंति क[2]र्षंति च महद्यशः ॥ २९ ॥
वृत्तं यत्नेन संरक्षेद्वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥ ३० ॥
गोभिः पशुभिरश्वैश्च कृष्या च सुसमृद्धया ।
कुलानि न प्ररोहन्ति यानि हीनानि वृत्ततः ॥ ३१ ॥
मा नः कुले वैरकृत्कश्चिदस्तु राजामात्यो मा परस्वापहारी ।
मित्त्रद्रोही नै[3]कृतिकोऽनृती वा पूर्वा[4]शी वा पितृदेवातिथिभ्यः ३२
यश्च नो ब्राह्मणान्हन्याद्यश्च नो ब्राह्मणान्द्विषेत् ।
न नः स समितिं गच्छेद्यश्च नो निर्वपेत् कृषिम् ॥ ३३ ॥
तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ ३४ ॥
श्रद्धया परया राजन्नुपनीतानि सत्कृतिम् ।
प्रवृत्तानि महाप्राज्ञ धर्मिणां पुण्यकर्मिणाम् ॥ ३५ ॥
सूक्ष्मोपि भारं नृपते स्यन्दनो वै शक्तो वोढुं न तथान्ये महीजाः ।
एवं युक्ता[5] भारसहा भवन्ति महाकुलीना न तथान्ये मनुष्याः॥३६॥

---

१ न्यासः निक्षेपः यद्द्रव्यं विश्वासेन स्थाप्यते तत् (थापण) तस्यापहरणे प्रतिदानाभावः । २ नयन्ति । ३ मायावी । ४ तेभ्योऽनिवेद्य भोक्ता । ५ युक्ता योग्याः ।

न तन्मित्त्रं यस्य कोपाद्बिभेति यद्वा मित्त्रं शङ्कितेनोपचर्यम् ।
यस्मिन्मित्त्रे पितरीवाश्वसीत तद्वै मित्त्रं संगतानीतराणि ॥३७॥

यः कश्चिदप्यसंबद्धो मित्रभावेन वर्तते ।
स एव बन्धुस्तन्मित्त्रं सा गतिस्तत्परायणम् ॥ ३८ ॥

चलचित्तस्य वै पुंसो वृद्धाननुपसेवतः ।
पारिप्लवमतेर्नित्यमध्रुवो मित्त्रसंग्रहः ॥ ३९ ॥

चलचित्तमनात्मानमिन्द्रियाणां वशानुगम् ।
अर्थाः समभिवर्तन्ते हंसाः शुष्कं सरो यथा ॥ ४० ॥

अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः ।
शीलमेतदसाधूनामभ्रं पारिप्लवं यथा ॥ ४१ ॥

सत्कृताश्च कृतार्थाश्च मित्त्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुंजते ॥ ४२ ॥

अर्चयेदेव मित्त्राणि सति वाऽसति वा धने ।
नानर्थयन्प्रजानाति मित्त्राणां सारफल्गुताम् ॥ ४३ ॥

संतापाद्भ्रश्यते रूपं संतापाद्भ्रश्यते बलम् ।
संतापाद्भ्रश्यते ज्ञानं संतापाव्द्याधिमृच्छति ॥ ४४ ॥

अनवाप्यं च शोकेन शरीरं चोपतप्यते ।
अमित्राश्च प्रहृष्यन्ति मास्म शोके मनः कृथाः ॥ ४५ ॥

पुनर्नरो म्रियते जायते च पुनर्नरो हीयते वर्धते च ।
पुनर्नरो याचति याच्यते च पुनर्नरः शोचति शोचते च ॥४६॥

---

१ शङ्कया सेवायोग्यम् । २ चञ्चलमतेः । ३ स्रजन्ति न निकटं समायान्ति दूरत एव गच्छन्ति इत्यर्थः । ४ मांसभक्षकाः । ५ अवाप्तुं प्राप्तुमशक्यम् ।

सुखं च दुःखं च भवाभवौ च लाभालाभौ मरणं जीवितं च।
पर्यायशः सर्वमेते स्पृशन्ति तस्माद्धीरो न च हृष्येन्न शोचेत् ॥४७

चलानि हीमानि षेडिन्द्रियाणि तेषां यद्यद्वर्धते यत्र यत्र।
ततस्ततः स्रवते बुद्धिरस्य छिद्रोदकुम्भादिव नित्यमम्भः ॥ ४८ ॥

धृतराष्ट्र उवाच।

तनुरुद्धः शिखी राजा मिथ्योपचरितो मया।
मन्दानां मम पुत्राणां युद्धेनान्तं करिष्यति ॥ ४९॥

नित्योद्विग्नमिदं सर्वं नित्योद्विग्नमिदं मनः।
यत्तत्पदमनुद्विग्नं तन्मे वद महामते ॥ ५० ॥

विदुर उवाच।

नान्यत्र विद्यातपसोर्नान्यत्रेन्द्रियनिग्रहात्।
नान्यत्र लोभसंत्यागाच्छान्तिं पश्यामि तेऽनघ ॥ ५१ ॥

बुद्ध्या भयं प्रणुदति तपसा विन्दते महः।
गुरुशुश्रूषया ज्ञानं शान्तिं योगेन विन्दति ॥ ५२ ॥

अनाश्रिता दानपुण्यं वेदपुण्यमनाश्रिताः।
रागद्वेषविनिर्मुक्ता विचरन्तीह मोक्षिणः ॥ ५३ ॥

स्वधीतस्य सुयुद्धस्य सुकृतस्य च कर्मणः।
तपसश्च सुतप्तस्य तस्यान्ते सुखमेधते ॥ ५४ ॥

स्वास्तीर्णानि शयनानि प्रपन्ना न वै भिन्ना जातु निद्रां लभन्ते।
न स्त्रीषु राजन् रतिमाप्नुवन्ति न मागधैस्तूयमाना न सूतैः ॥५५॥

---

१ क्रमेण। २ मनः षष्ठानीन्द्रियाणि। ३ निर्गच्छति। ४ तितिक्षया तनुरुद्धसामर्थ्यः। ५ अग्निः। ६ बाल्ये व्यर्थं पोषितः। ७ दूरीकरोति। ८ अनिच्छन्तः।

न वै भिन्ना[1] जातु चरन्ति धर्मं न वै सुखं प्राप्नुवन्तीह भिन्नाः ।
न वै भिन्ना गौरवं प्राप्नुवन्ति न वै भिन्नाः प्रशमं रोचयन्ति ॥५६॥
न वै तेषां स्वदते[2] पथ्यमुक्तं[3] योगक्षेमं[4] कल्पते नैव तेषाम् ।
भिन्नानां वै मनुजेन्द्र परायणं[5] न विद्यते किंचिदन्यद्विनाशात्॥५७
संपन्नं[6] गोषु संभाव्यं संभाव्यं ब्राह्मणे तपः ।
संभाव्यं चापलं स्त्रीषु संभाव्यं ज्ञातितो भयम् ॥ ५८ ॥
तन्तवः प्यायिता[7] नित्यं तन्तवो[8] बहुलाः समाः ।
बहून्बहुत्वादायासान्सहंतीत्युपमा सताम् ॥ ५९ ॥
धूमायन्ते व्यपेतानि[9] ज्वलन्ति सहितानि[10] च ।
धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ ६० ॥
ब्राह्मणेषु च ये शूराः स्त्रीषु ज्ञातिषु गोषु च ।
वृन्तादिव[11] फलं पक्वं धृतराष्ट्र पतन्ति ते ॥ ६१ ॥
महानप्येकजो[12] वृक्षो बलवान्सुप्रतिष्ठितः ।
प्रसह्य[13] एव वातेन सस्कन्धो[14] मर्दितुं क्षणात् ॥ ६२ ॥
अथ ये सहिता वृक्षाः शङ्घशः सुप्रतिष्ठिताः ।
ते हि शीघ्रतमान्वातान् सहन्तेऽन्योन्यसंश्रयात् ॥ ६३ ॥
एवं मनुष्यमप्येकं गुणैरपि समन्वितम् ।
शक्यं द्विषन्तो मन्यन्ते वायुर्द्रुममिवैकजम् ॥ ६४ ॥

---

१ स्वज्ञातिविरोधिनः । २ रोचते । ३ हितम् । ४ योगः अलब्धलाभोद्योगः क्षेमं लब्धपरिरक्षणम् । ५ शरणम् । ६ दुग्धादिसंपत्तिमत्त्वम् । ७ दृढीकृताः । ८ सूक्ष्माः । ९ व्यस्तानि । १० मिलितानि । ११ प्रसवबन्धनं वृन्तम् । १२ असहायः । १३ शक्यः । १४ सशाखः । १५ उन्मूलयितुमिति शेषः ।

अन्योन्यसमुपष्टम्भादन्योन्यापाश्रयेण च ।
ज्ञातयः संप्रवर्धन्ते सरसीवोत्पलान्युत ॥ ६५ ॥
अवध्या ब्राह्मणा गावो ज्ञातयः शिशवः स्त्रियः ।
येषां चान्नानि भुञ्जीत ये च स्युः शरणागताः ॥ ६६ ॥
न मनुष्ये गुणः कश्चिद्राजन्सधनतामृते[1] ।
अनातुरत्वाद्भद्रं[2] ते मृतकल्पा हि रोगिणः ॥ ६७ ॥
अव्याधिजं कटुकं शीर्षरोगि पापानुबन्धं परुषं तीक्ष्णमुष्णम् ।
सतां पेयं यन्न पिबन्त्यसन्तो मन्युं महाराज पिब प्रशाम्य ॥६८॥
रोगार्दिता न फलान्याद्रियन्ते न वै लभन्ते विषयेषु तत्त्वम्[3] ।
दुःखोपेता रोगिणो नित्यमेव न बुध्यन्ते[4] धनभोगान्न सौख्यम् ॥६९
पुरा ह्युक्तं नाकरोस्त्वं वचो मे द्यूते जितां द्रौपदीं प्रेक्ष्य राजन् ।
दुर्योधनं वारयेत्यक्षवत्यां[5] कितवत्वं[6] पण्डिता वर्जयन्ति ॥ ७० ॥
न तद्बलं यन्मृदुना विरुध्यते सूक्ष्मो धर्मस्तरसा[7] सेवितव्यः ।
प्रध्वंसिनी[8] क्रूरसमाहिता[9] श्रीर्मृदुप्रौढा गच्छति पुत्रपौत्रान् ॥७१॥
धार्तराष्ट्राः पाण्डवान्पालयन्तु पाण्डोः सुतास्तव पुत्राँश्च पान्तु ।
एकारिमित्राः कुरवो ह्येककार्या जीवन्तु राजन्सुखिनः समृद्धाः॥
मेढीभूतः[10] कौरवाणां त्वमद्य त्वय्याधीनं कुरुकुलमाजमीढ[11] ।
पार्थान्बालान्वनवासप्रतप्तान्गोपायस्व स्वं यशस्तात रक्षन्॥७३॥

---

१ धनिकताम् । २ आरोग्यात् । ३ विवेकम् । ४ जानन्ति । ५ द्यूतक्रियायाम् । ६ द्यूतप्रियत्वम् । ७ वेगेन । ८ प्रध्वंसितुं शीलं यस्या सा नश्वरस्वभावेति यावत् । ९ औदार्यादिगुणबहिष्कृते क्रूरे पुंसि समाहिता स्थिता । १० मेढिः स्तम्भः तद्वत्त्वं प्रतिरोधक इत्यर्थः । ११ हे धृतराष्ट्र ? ।

संधत्स्व त्वं कौरव पाण्डुपुत्रैर्मा तेऽतेरं रिपवः प्रार्थयन्तु ।
सत्ये स्थितास्ते नरदेव सर्वे दुर्योधनं स्थापय त्वं नरेन्द्र ॥ ७४ ॥

इति श्रीमहाभारते उद्योगपर्वणि प्रजागरपर्वणि विदुरहितवाक्ये षट्त्रिंशोऽध्यायः ॥ ३६ ॥

---

## विदुर उवाच ।

सप्तदशेमान् राजेंद्र मनुः स्वायंभुवोऽब्रवीत् ।
वैचित्रवीर्य पुरुषानाकाशं मुष्टिभिर्घ्नतः ॥ १ ॥
दानवेंद्रस्य च धनुरनाम्यं नमतोऽब्रवीत् ।
अथो मरीचिर्नः पादानग्राह्यान् गृह्णतस्तथा ॥ २ ॥
यश्चाशिष्यं शास्ति वै यश्च तुष्येद्यश्चातिवेलं भजते द्विषन्तम् ।
स्त्रियश्च यो रक्षति भद्रमश्नुते यश्चायाच्यं याचते कत्थते वा ॥ ३ ॥
यश्चाभिजातः प्रकरोत्यकार्यं यश्चाबलो बलिना नित्यवैरी ।
अश्रद्दधानाय च यो ब्रवीति यश्चाकाम्यं कामयते नरेंद्र ॥ ४ ॥
वध्वाऽवहासं श्वशुरो मन्यते यो वध्वाऽवसन्नभयो मानकामः ।
परक्षेत्रे निर्वपति यश्च बीजं स्त्रियं च यः परिवदतेऽतिवेलम् ॥ ५ ॥
यश्चापि लब्ध्वा न स्मरामीति वादी दत्वा च यः कत्थति याच्यमानः ।
यश्चासतः सत्त्वमुपानयीत एतान्नयंति निरयं पाशहस्ताः ॥६॥

---

१ संधिं विधत्स्व । २ भेदं । ३ ते पाण्डुपुत्राः । ४ युद्धोद्योगगतेर्निवर्तय । ५ विचित्रवीर्यस्यपुत्र धृतराष्ट्र । ६ मूर्खानिति शेषः । ७ दनूनां मेघानां समूहो दानवं तस्मिन्दानवे इन्द्रस्य धनुः संधिरार्षः । मेघसमूहे परिदृश्यमानस्य धनुषोज्योतिः प्रतिभासत्वान्नतन्नामयितुं शक्यमिति भावः । ८ सूर्यस्य किरणान् । ९ कुलमर्यादामतिक्रम्य । १० परस्मैपदमार्षम् । यश्चार्थिने दत्त्वा बहु दाताहमस्मीत्यात्मानं श्लाघते । ११ असत्यस्य । १२ सत्ताम् । १३ नरकम् ।

यस्मिन् यथा वर्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः साध्वाचारः साधुना प्रत्युपेयः ॥७॥
जरारूपं हरति हि धैर्यमाशा मृत्युः प्राणान्धर्मचर्यामसूया ।
कामो ह्रियं वृत्तमनार्यसेवा क्रोधः श्रियं सर्वमेवाभिमानः ॥८॥

धृतराष्ट्र उवाच

शतायुरुक्तः पुरुषः सर्ववेदेषु वै यदा ।
नाप्नोत्यथ च तत्सर्वमायुः केनेह हेतुना ॥ ९ ॥

विदुर उवाच ।

अतिमानोऽतिवादश्च तथाऽत्यागो नराधिप ।
क्रोधश्चात्मविधित्सा च मित्रद्रोहश्च तानि षट् ॥ १० ॥
एत एवासयस्तीक्ष्णाः कृन्तन्त्यायूंषि देहिनाम् ।
एतानि मानवान्घ्नन्ति न मृत्युर्भद्रमस्तु ते ॥ ११ ॥
विश्वस्तस्यैति यो दारान् यश्चापि गुरुतल्पगः ।
वृषलीपतिर्द्विजो यश्च पानपश्चैव भारत ॥ १२ ॥
आदेशकृद्वृत्तिहन्ता द्विजानां प्रेषकश्च यः ।
शरणागतहा चैव सर्वे ब्रह्महणः समाः ॥
एतैः समेत्य कर्तव्यं प्रायश्चित्तमिति श्रुतिः ॥ १३ ॥
गृहीतवाक्यो नयविद्वदान्यः शेषान्नभोक्ता ह्यविहिंसकश्च ।
नानर्थकृत्याकुलितः कृतज्ञः सत्यो मृदुः स्वर्गमुपैति विद्वान् ॥१४॥

१ मायावी । २ आत्मनः स्वस्य विधित्सा पोषणेच्छा । ३ खड्गाः । ४ छिन्दन्ति । ५ शूद्रापतिः । ६ मदिराद्यपेयपानकर्ता । ७ ग्रामणीर्हि पामरजनान्परानेव पृथ्वीपतिकर्मणि विना वेतनं विष्टया प्रयोजयति न स्वयं करोति । ८ उभयत्र संबध्यते द्विजानामिति । ९ संगत्य । १० विद्यावान्विनयी वा । ११ दाता । १२ देवादिनिवेदितान्नभोजी । १३ कृतं जानाति । १४ सत्यवक्ता । १५ कारुणिकः ।

सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ १५ ॥
यो हि धर्मं समाश्रित्य हित्वा भर्तुः प्रियाप्रिये ।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥ १६ ॥
त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ १७ ॥
आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ १८ ॥
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं नृणाम् ।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥ १९ ॥
उक्तं मया द्यूतकालेऽपि राजन्नेदं युक्तं वचनं प्रातिपेय ।
तदौषधं पथ्यमिवातुरस्य न रोचते तव वैचित्रवीर्य ॥ २० ॥
काकैरिमाँश्चित्रबर्हान्मयूरान्पराजयेथाः पाण्डवान्धार्तराष्ट्रैः ।
हित्वा सिंहान् क्रोष्टुकान्गूहमानः प्राप्ते काले शोचिता त्वं नरेन्द्र ॥ २१ ॥
यस्तात न क्रुध्यति सार्वकालं भृत्यस्य भक्तस्य हिते रतस्य ।
तस्मिन्भृत्या भर्तरि विश्वसन्ति न चैनमापत्सु परित्यजन्ति ॥२२॥
न भृत्यानां वृत्तिसंरोधनेन[1] राज्यं धनं संजिघृक्षेदपूर्वम् ।
त्यजन्ति ह्येनं वंचिता वै विरुद्धाः स्निग्धा ह्यमात्याः परिहीनभोगाः॥
कृत्यानि पूर्वं परिसंख्याय[2] सर्वाण्यायव्यये चानुरूपां[3] च वृत्तिम् ।
संगृह्णीयादनुरुपान्सहायान्सहायसाध्यानि हि दुष्कराणि ॥२४॥

---

१ वेतनादिप्रतिबन्धेन । २ साध्यं नवेति विचार्य । ३ योग्यां ।

अभिप्रायं यो विदित्वा तु भर्तुः सर्वाणि कार्याणि करोत्यत[1]न्द्री ।
वक्ता हितानामनुरक्त आर्यः [2]शक्तिज्ञ आत्मेव हि सोऽनुकम्प्यः ॥
वाक्यं तु यो नाद्रियतेऽ[3]नुशिष्टः प्रत्या[4]ह यश्चापि नियुज्यमानः ।
प्रज्ञाभिमानी प्रति[5]कूलवादी त्याज्यः स तादृक्त्वरयैव भृत्यः ॥२६
अस्त[6]ब्धमक्ली[7]बमदीर्घ[8]सूत्रं सानु[9]क्रोशं श्ल[10]क्ष्णम[11]हार्यमन्यैः ।
[12]अरोगजातीयमुदारवाक्यं दूतं वदन्त्यष्टगुणोपपन्नम् ॥ २७ ॥
न विश्वासाज्जातु परस्य गेहे गच्छेन्नरश्चे[13]तयानो वि[14]काले ।
न [15]चत्वरे निशि तिष्ठेन्नि[16]गूढो न राजकाम्यां योषितं प्रार्थयीत[17] २८
न नि[18]र्हणं वं मन्त्रगतस्य गच्छेत्सं[19]सृष्टमन्त्रस्य कुसंगतस्य ।
न च ब्रूयान्नाश्वसिमि त्वयीति [20]सकारणं व्यपदेशं तु कुर्यात् ॥२९॥
[21]घृणी राजा पुं[22]श्चली राजभृत्यः पुत्रो भ्राता विधवा बालपुत्रा ।
सेनाजीवी चो[23]द्धृतभूतिरेव व्य[24]वहारेषु वर्जनीयाः स्युरेते ॥ ३० ॥
अष्टौ गुणाः पुरुषं दी[25]पयन्ति प्रज्ञा च कौल्यं च श्रुतं दमश्च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ ३१ ॥
एतान्गुणांस्तात महानुभावानेको गुणः संश्रयते प्रसह्य ।
राजा यदा सत्कुरुते मनुष्यं सर्वान्गुणानेष गुणो बिभर्ति ॥३२॥

---

१ अनलसः । २ शक्तयो हि तिस्रो नीतिशास्त्रे प्रसिद्धास्ता जानाति । ३ शिक्षितः । ४ प्रत्याख्यानं करोति । ५ आज्ञाविरुद्धं वदतीति । ६ दर्पशून्यम् । ७ सामर्थ्यवन्तम् । ८ शीघ्रकारिणम् । ९ भर्तुर्हानिर्मास्तु इति सदयम् । १० मञ्जुलम् । ११ अभेद्यम् । १२ रोगलेशशून्यम् । १३ संजानन् । १४ असमये । १५ अङ्गणे । १६ छन्नः । १७ संभोक्तुमिति शेषः । १८ अपहारं न गच्छेत् । १९ बहुकर्तृकत्वेन संसृष्टः । २० मम किंचिदत्यावश्यकं कार्यमस्तीति व्याजं कृत्वा तस्मादपसरेत् । २१ लज्जावान् । २२ वेश्या । २३ दूरीकृताधिकार इति नी० । २४ द्रव्यदानादिकर्मसु । २५ प्रकाशयन्ति ।

गुणा दश स्नानशीलं भजन्ते बलं रूपं स्वरवर्णप्रशुद्धिः ।
स्पर्शश्च गन्धश्च विशुद्धता च श्रीः सौकुमार्यं प्रवराश्च नार्यः ३३
गुणाश्च षण्मित[1]भुक्तं भजन्ते आरोग्य[2]मायुश्च बलं सुखं च ।
अना[3]विलं चास्य भवत्यपत्यं न चैनमाद्यून इति क्षिपन्ति ॥३४॥
अकर्मशीलं च महाशनं च लोकद्विष्टं बहु[4]मायं नृशंसम् ।
अदेशकालज्ञमनिष्टवेषमेतान्गृहे न प्रतिवासयेत ॥ ३५ ॥
कदर्यमाक्रोश[5]कमश्रु[6]तं च वना[7]कसं धू[8]र्तममान्य[9]मानिनम् ।
नि[10]ष्ठूरिणं कृतवैरं कृतघ्नमेतान्भृशार्तोऽपि न जातु याचेत् ॥३६॥
संक्लि[11]ष्टकर्माणमतिप्रमादं नित्यानृतं चादृढभक्तिकं च ।
विसृष्ट[12][13]रागं पटुमानिनं चाप्येतान्न सेवेत नराधमान्षट् ॥ ३७ ॥
सहायबन्धना ह्यर्थाः सहायाश्चार्थबन्धनाः ।
अन्योन्यबन्धनावेतौ विनान्योन्यं न सिध्यतः ॥ ३८ ॥
उत्पाद्य पुत्राननृणांश्च कृत्वा वृत्तिं च तेभ्योनुविधाय कांचित् ।
स्था[14]ने कुमारीः प्रतिपाद्य सर्वा अरण्यसंस्थोऽथ मुनिर्बुभूषेत् ॥ ३९
हितं यत्सर्वभूतानामात्मनश्च सुखावहम् ।
तत्कुर्यादीश्वरे ह्येतन्मूलं सर्वार्थसिद्धये ॥ ४० ॥
वृद्धिः प्रभावस्तेजश्च सत्त्वमु[15]त्थानमेव च ।
व्यव[16]सायश्च यस्य स्यात्तस्यावृत्तिभयं कुतः ॥ ४१ ॥

---

१ परिमितभोजिनम् । २ रोगाभावः । ३ स्वच्छम् । ४ बहुभोजी । ५ महाजालिकम् । ६ गालिप्रदातारम् । ७ अनधीतविद्यं मूर्खमित्यर्थः । ८ कैवर्तकम् । ९ कितवम् । १० बहु सत्कृतेपि नाहमनेन सत्कृत इति मन्वानम् । ११ क्रूरम् । १२ आततायिनम् 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः' नी० । १३ त्यक्तस्नेहम् । १४ स्थाने योग्यस्थाने कुमारीः पुत्रीः विवाह्य । १५ उद्यमः । १६ निश्चयः ।

पश्य दोषान्पाण्डवैर्विग्रहे त्वं यत्र व्यथेयुरपि देवाः सशक्राः ।
पुत्रैर्वैरं नित्यमुद्विग्नवासो यशःप्रणाशो द्विषतां च हर्षः ॥ ४२ ॥

भीष्मस्य कोपस्तव चैवेन्द्रकल्पद्रोणस्य राज्ञश्च युधिष्ठिरस्य ।
उत्सादयेल्लोकमिमं प्रवृद्धः श्वेतो ग्रहस्तिर्यगिवापतन्खे ॥ ४३ ॥

तव पुत्रशतं चैव कर्णः पञ्च च पाण्डवाः ।
पृथिवीमनुशासेयुरखिलां सागराम्बराम् ॥ ४४ ॥

धार्तराष्ट्रा वनं राजन् व्याघ्राः पाण्डुसुता मताः ।
मा वनं छिंधि सव्याघ्रं मा व्याघ्रा नीनेशन्वनात् ॥ ४५ ॥

न स्याद्वनमृते व्याघ्रान् व्याघ्रा न स्युर्ऋते वनम् ।
वनं हि रक्ष्यते व्याघ्रैर्व्याघ्रान्रक्षति काननम् ॥ ४६ ॥

न तथेच्छन्ति कल्याणान् परेषां वेदितुं गुणान् ।
यथैषां ज्ञातुमिच्छन्ति नैर्गुण्यं पापचेतसः ॥ ४७ ॥

अर्थसिद्धिं परामिच्छन् धर्ममेवादितश्चरेत् ।
न हि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतम् ॥ ४८ ॥

यस्यात्मा विरतः पापात् कल्याणे च निवेशितः ।
तेन सर्वमिदं बुद्धं प्रकृतिर्विकृतिश्च या ॥ ४९ ॥

यो धर्ममर्थं कामं च यथाकालं निषेवते ।
धर्मार्थकामसंयोगं सोऽमुत्रेह च विन्दति ॥ ५० ॥

सन्नियच्छति यो वेगमुत्थितं क्रोधहर्षयोः ।
स श्रियो भाजनं राजन् यश्चापत्सु न मुह्यति ॥ ५१ ॥

बलं पंचविधं नित्यं पुरुषाणां निबोध मे ।
यत्तु बाहुबलं नाम कनिष्ठं बलमुच्यते ॥ ५२ ॥

---

१ धूमकेतुरिति नी०। २ नाशं प्राप्नुयुः। ३ दुर्योधनादयः।

अमात्यलाभो भद्रं ते द्वितीयं बलमुच्यते ।
तृतीयं धनलाभं तु बलमाहुर्मनीषिणः ॥ ९३ ॥
यत्त्वस्य सहजं राजन् पितृपैतामहं बलम् ।
अभिजातबलं[1] नाम तच्चतुर्थं बलं स्मृतम् ॥ ९४ ॥
येन त्वेतानि सर्वाणि संगृहीतानि भारत ।
यद्बलानां बलं श्रेष्ठं तत्प्रज्ञाबलमुच्यते ॥ ९५ ॥
महते योऽपकाराय नरस्य प्रभवेन्नरः ।
तेन वैरं समासज्य दूरस्थोऽस्मीति नाश्वसेत् ॥ ९६ ॥
स्त्रीषु राजसु सर्पेषु स्वाध्यायप्रभुशत्रुषु ।
भोगेष्वायुषि विश्वासं कः प्राज्ञः कर्तुमर्हति ॥ ९७ ॥
प्रज्ञाशरेणाभिहतस्य जन्तोश्चिकित्सकाः[2] सन्ति न चौषधानि ।
न होममन्त्रा न च मङ्गलानि नाथर्वणा[3] नाप्यगदाः[4] सुसिद्धाः ॥ ९८ ॥
सर्पश्चाग्निश्च सिंहश्च कुलपुत्रश्च भारत ।
नावज्ञेया मनुष्येण सर्वे ह्येतेऽतितेजसः ॥ ९९ ॥
अग्निस्तेजो महल्लोके गूढस्तिष्ठति दारुषु ।
न चोपयुङ्क्ते तद्दारु यावन्नोद्दीप्यते परैः ॥ ६० ॥
स एव खलु दारुभ्यो यदा निर्मथ्य दीप्यते ।
तद्दारु च वनं चान्यन्निर्दहत्याशु तेजसा ॥ ६१ ॥
एवमेव कुले जाताः पावकोपमतेजसः ।
क्षमावन्तो निराकाराः[6] काष्ठेऽग्निरिव शेरते ॥ ६२ ॥

---

१ सत्कुलबलम् । २ वैद्याः । ३ आथर्वणवेदोक्ता मन्त्राः । ४ पारदादयः । ५ ज्ञातिरिति नी० । ६ गुप्ताकाराः ।

लताधर्मा त्वं सपुत्रः शालाः[1] पाण्डुसुता मताः ।
न लता वर्धते जातु महाद्रुममनाश्रिता ॥ ६३ ॥
वनं राजंस्तव पुत्रोऽम्बिकेय सिंहान्वने पाण्डवाँस्तात विद्धि ।
सिंहैर्विहीनं हि[2] वनं विनश्येत् सिंहा विनश्येयुर्ऋते वनेन ॥६४॥

इति श्रीमहाभारते उद्योगपर्वणि प्रजागरपर्वणि विदुरहितवाक्ये सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

---

## विदुर उवाच

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति[3] ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥ १ ॥
पीठं दत्त्वा साधवेऽभ्यागताय आनीयापः परिनिर्णिज्य[4] पादौ ।
सुखं पृष्ट्वा[5] प्रतिवेद्यात्मसंस्थां[6] ततो दद्यादन्नमवेक्ष्य धीरः ॥ २ ॥
यस्योदकं मधुपर्कं च गां च न मन्त्रवित्[7]प्रतिगृह्णाति गेहे ।
लोभाद्भयादथ कार्पण्यतो वा तस्यानर्थं जीवितमाहुरार्याः ॥ ३ ॥
चिकित्सकः शल्यकर्ता[8]वकीर्णी[9] स्तेनः क्रूरो मद्यपो भ्रूणहा च ।
सेनाजीवी श्रुतिविक्रायक[10]श्च भृशं प्रियोऽप्यतिथिर्नोदकार्हः ॥४॥
अविक्रेयं लवणं[11] पक्वमन्नं दधि क्षीरं मधु तैलं घृतं च ।
तिला मांसं फलमूलानि शाकं रक्तं वासः सर्वगन्धा गुडाश्च ॥५॥
अरोषणो[12] यः समलोष्टाश्मकांचनः प्रहीण[13]शोको गतसन्धिविग्रहः[14] ।
निन्दाप्रशंसोपरतः प्रियाप्रिये त्यजन्नुदासीनवदेष भिक्षुकः ॥६॥

---

१ सरलवृक्षाः । २ अवधारणे । ३ आगच्छति सति । ४ प्रक्षाल्य । ५ कथयित्वा । ६ स्वावस्थाम् । ७ श्रोत्रियः । ८ शस्त्रकर्त्ता । ९ क्षतब्रह्मचर्याव्रतः 'अवकीर्णी क्षतव्रत' इति कोशात् । १० द्रव्यं गृहीत्वा वेदपाठकः । ११ विक्रेतुमयोग्यानि द्रव्याणीमानि । १२ अक्रोधनः । १३ प्रहीणो नष्टः शोको यस्य निर्द्वन्द्वत्वात्सदानन्द इति यावत् । १४ रागद्वेषादिरहितः ।

नीवार[1]मूलेङ्गुदशाकवृत्तिः सुसंयतात्माग्निकार्येषु[2] चोद्यः[3] ।
वने वसन्नतिथिष्वप्रमत्तो धुरंधरः पुण्यकृदेष तापसः[4] ॥ ७ ॥
अपकृत्य बुद्धिमतो दूरस्थोस्मीति नाश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः ॥ ८ ॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ९ ॥
अनीर्षुर्गुप्तदारश्च संविभागी[5] प्रियंवदः ।
श्लक्ष्णो मधुरवाक् स्त्रीणां न चासां वशगो भवेत् ॥ १० ॥
पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः ॥ ११ ॥
पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसम् ।
गोषु[6] चामत्समं[7] दद्यात्स्वयमेव कृषिं व्रजेत् ॥ १२ ॥
भृत्यैर्वाणिज्यचारं च पुत्रैः सेवेत च द्विजान् ।
अद्भयोग्निर्ब्रह्मतः[8] क्षत्रमश्मनो लोहमुत्थितम् ॥ १३ ॥
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ।
नित्यं सन्तः कुले जाताः पावकोपमतेजसः ॥ १४ ॥
क्षमावन्तो निराकाराः काष्ठेग्निरिव शेरते ।
यस्य मन्त्रं न जानन्ति बाह्याश्चाभ्यन्तरा[9]श्च ये ॥ १५ ॥
स राजा सर्वतश्चक्षुश्चिरमैश्वर्यमश्नुते ।
करिष्यन्न प्रभाषेत कृतान्येव तु दर्शयेत् ॥ १६ ॥

---

१ नीवारो मुनिधान्यविशेषः । २ अग्निहोत्रादिकर्मसु । ३ विधेयः सावधानः नी० । ४ तपस्वी । ५ सम्यग्विभागकर्त्ता । ६ पशुषु । ७ स्वसमानम् । ८ ब्राह्मणात् । ९ क्षत्रवः । १० आमात्मादयोपि ।

धर्मकामार्थकार्याणि तथा मन्त्रो न भिद्यते ।
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः ॥ १७ ॥
अरण्ये निःशलाके[1] वा तत्र मन्त्रोऽभिधीयते ।
नासुहृत्परमं मन्त्रं भारतार्हति वेदितुम् ॥ १८ ॥
अपण्डितो वापि सुहृत् पण्डितो वाप्यनात्मवान् ।
नापरीक्ष्य महीपालः कुर्यात्सचिवमात्मनः ॥ १९ ॥
अमात्ये ह्यर्थलिप्सा च मन्त्ररक्षणमेव च ।
कृतानि सर्वकार्याणि यस्य पारिषदो[2] विदुः ॥ २० ॥
धर्मे चार्थे च कामे च स राजा राजसत्तमः ।
गूढमन्त्रस्य नृपतेस्तस्य सिद्धिरसंशयम् ॥ २१ ॥
अप्रशस्तानि कार्याणि यो मोहादनुतिष्ठति ।
स तेषां विपरिभ्रंशाद्भ्रश्यते जीवितादपि ॥ २२ ॥
कर्मणां तु प्रशस्तानामनुष्ठानं सुखावहम् ।
तेषामेवाननुष्ठानं पश्चात्तापकरं मतम् ॥ २३ ॥
अनधीत्य यथा वेदान्न विप्रः श्राद्धमर्हति ।
एवमश्रुत[3]षाड्गुण्यो न मन्त्रं श्रोतुमर्हति ॥ २४ ॥
स्था[4]नवृद्धिक्षयज्ञस्य षाड्गुण्य[5]विदितात्मनः ।
अनव[6]ज्ञातशीलस्य स्वाधीना पृथिवी नृप ॥ २५ ॥
अमो[7]घक्रोधहर्षस्य स्वयं कृत्वान्ववेक्षिणः ।
आत्म[8]प्रत्ययकोशस्य वसु[9]देव वसुंधरा ॥ २६ ॥

---

१ तृणाद्यावरणरहिते । २ सभ्याः । ३ अश्रुतोनधीतः संध्यादीनां गुणानां समुदायो येन सः । ४ स्थानं रक्षणम् । ५ षड्गुणप्रवीणत्वेन विदित आत्मा यस्य तस्य । ६ अनवमतस्वभावस्य । ७ मोघो निष्फलः अमोघः सफलः । ८ स्वयमेव ज्ञातकोष्ठागारादिव्यवहारस्य । ९ धनदा ।

नाममात्रेण तुष्येत छत्रेण च महीपतिः ।
भृत्येभ्यो विसृजेदर्थान्नैकः सर्वहरो भवेत् ॥ २७ ॥
ब्राह्मणं ब्राह्मणो वेद भर्ता वेद स्त्रियं तथा ।
अमात्यं नृपतिर्वेद राजा राजानमेव च ॥ २८ ॥
न शत्रुर्वशमापन्नो मोक्तव्यो वध्यतां गतः ।
न्यग्भूत्वा पर्युपासीत वध्यं हन्याद्बले सति ॥
अहताद्धि भयं तस्माज्जायते न चिरादिव ॥ २९ ॥
दैवतेषु प्रयत्नेन राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा क्रोधो वृद्धबालातुरेषु च ॥ ३० ॥
निरर्थं कलहं प्राज्ञो वर्जयेन्मूढसेवितम् ।
कीर्तिं च लभते लोके न चानर्थेन युज्यते ॥ ३१ ॥
प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं भर्तारमिच्छंति षण्ढं पतिमिव स्त्रियः ॥ ३२ ॥
न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः ॥ ३३ ॥
विद्याशीलवयोवृद्धान् बुद्धिवृद्धांश्च भारत ।
धनाभिजातवृद्धांश्च नित्यं मूढोऽवमन्यते ॥ ३४ ॥
अनार्यवृत्तमप्राज्ञमसूयकमधार्मिकम् ।
अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा ॥ ३५ ॥
अविसंवादनं दानं समयस्याव्यतिक्रमः ।
आवर्तयन्ति भूतानि सम्यक्प्रणिहिता च वाक् ॥ ३६ ॥

---

१ नाम्नैव राजा भोगादिकं सर्वसाधारणं भुञ्जीत । २ नपुंसकम् । ३ लोकस्य पर्यायः इह लोके कृतस्य कर्मणः परलोके फलप्राप्तिवृत्तान्तादिकम् । ४ कठोरवाचम् । ५ वञ्चनारहितम् । ६ स्वकृतमर्यादायाः । ७ शत्रूनपि मित्त्रत्वेन परिणमयन्ति । ८ प्रयुक्ता ।

अविसंवादको दक्षः कृतज्ञो मतिमानृजुः ।
अपि सङ्क्षीणकोशोऽपि लभते परिवारणम्[1] ॥३७॥

धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः[2] श्रियः ॥ ३८ ॥

असंविभागी[3] दुष्टात्मा कृतघ्नो निरपत्रपः[4] ।
तादृङ्नराधिपो लोके वर्जनीयो नराधिप ॥ ३९ ॥

न च रात्रौ सुखं शेते ससर्प इव वेश्मनि ।
यः कोपयति निर्दोषं सदोषोभ्यंतरं जनम् ॥ ४० ॥

येषु दुष्टेषु दोषः स्याद्योगक्षेमस्य भारत ।
सदा प्रसादनं तेषां देवतानामिवाचरेत् ॥ ४१ ॥

येऽर्थाः स्त्रीषु समायुक्ताः[5] प्रमत्तपतितेषु च ।
ये चानार्ये समासक्ताः सर्वे ते संशयं गताः ॥ ४२ ॥

यत्र स्त्री यत्र कितवो[7] बालो यत्रानुशासिता ।
मज्जन्ति तेऽवशा राजन्नद्यामश्मप्लवा[8] इव ॥ ४३ ॥

प्रयोजनेषु[9] ये सक्ता न विशेषेषु भारत ।
तानहं पण्डितान्मन्ये विशेषा हि प्रसङ्गिनः[10] ॥ ४४ ॥

यं प्रशंसन्ति कितवा यं प्रशंसन्ति चारणाः ।
यं प्रशंसन्ति बन्धक्यो[11] न स जीवति मानवः ॥४५॥

हित्वा तान्परमेष्वासान् पाण्डवानमितौजसः ।
आहितं भारतैश्वर्यं त्वया दुर्योधने महत् ॥ ४६ ॥

---

१ भृत्यमित्रादीन् नी० । २ उत्तेजिकाः । ३ सम्यग्विभागमकृत्वा भोक्ता । ४ निर्लज्जः । ५ स्थापिताः । ६ कदाचित्प्राप्या इत्यर्थः । ७ धूर्तः । ८ पाषाणनौकाः । ९ अवश्यापेक्षितार्थेषु । १० संसारिणः । ११ वेश्याः ।

तं द्रक्ष्यसि परिभ्रष्टं तस्मात्त्वमचिरादिव ।
ऐश्वर्यमदसंमूढं बलिं[1] लोकत्रयादिव ॥ ४७ ॥

इति श्रीम०उद्योग०प्रजागरप०विदुरवाक्ये अष्टत्रिंशोऽध्यायः ॥३८॥

---

धृतराष्ट्र उवाच ॥

अनीश्वरो[2]ऽयं पुरुषो भवाभवे[3] सूत्रप्रोता दारुमयीव योषा[4] ।
धात्रा[5] तु दिष्टस्य[6] वशे कृतोऽयं तस्माद्वद त्वं श्रवणे धृतोऽहम् ॥ १ ॥

विदुर उवाच ॥

अप्राप्तकालं[7] वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुद्ध्यवज्ञानमवमानं च भारत ॥ २ ॥
प्रियो भवति दानेन प्रियवादेन चापरः ।
मन्त्रमूलबलेनान्यो[8] यः प्रियः प्रिय एव सः ॥ ३ ॥
द्वेष्यो[9] न साधुर्भवति न मेधावी न पंडितः ।
प्रिये शुभानि[10] कार्याणि द्वेष्ये पापानि चैव ह ॥ ४ ॥
उक्तं मया जातमात्रेऽपि राजन्दुर्योधनं त्यज पुत्रं त्वमेकम् ।
तस्य त्यागात्पुत्रशतस्य वृद्धिरस्यात्यागात्पुत्रशतस्य नाशः ॥५॥
न वृद्धिर्बहु मंतव्या या वृद्धिः क्षयमावहेत् ।
क्षयोऽपि बहु मंतव्यो यः क्षयो वृद्धिमावहेत् ॥ ६ ॥

---

१ दैत्याधिपतिम् । २ असमर्थः परवानित्यर्थः । ३ विभवाविभवे । ४ स्त्री । ५ विधात्रा । ६ दैवस्य । ७ समयरहितम् । ८ मन्त्रबलेन मूलबलेन एते सर्व उपाधिना कृतकाः प्रियाः सन्ति अहं पुनरीश्वरकृतसंबन्धेन प्रिय इति नान्यथा ब्रवीम्यतो मदुक्तिरनुसरणीयेति भावः । ९ शत्रुः उपचारशतेनापि साधुर्मित्रं न भवति । १० प्रियकृतानि कर्माणि सर्वाणि शोभनानि प्रतिभान्ति शत्रुकृतानि शुभान्यपि विपरीतानि दृश्यन्ते ।

न स क्षयो महाराज यः क्षयो वृद्धिमावहेत्।
क्षयः स त्विह मंतव्यो यं लब्ध्वा बहु नाशयेत्॥ ७॥

समृद्धा गुणतः केचिद्भवंति धनतोऽपरे।
धनवृद्धान्गुणैर्हीनान्धृतराष्ट्र विवर्जय॥ ८॥

धृतराष्ट्र उवाच॥

सर्वं त्वमायतीयुक्तं[1] भाषसे प्राज्ञसंम्मतम्।
न चोत्सहे सुतं त्यक्तुं यतो धर्मस्ततो जयः॥ ९॥

विदुर उवाच।

अतीव गुणसम्पन्नो न जातु विनयान्वितः।
सुसूक्ष्ममपि भूतानामुपमर्दमुपेक्षते॥ १०॥

परापवादनिरताः परदुःखोदयेषु च।
परस्परविरोधे च यतन्ते सततोत्थिताः॥ ११॥

सदोषं दर्शनं येषां संवासे सुमहद्भयम्।
अर्थादाने महान्दोषः प्रदाने च महद्भयम्॥ १२॥

ये वै भेदनशीलास्तु[3] सकामा निस्त्रपाः[4] शठाः।
ये पापा इति विख्याताः संवासे[5] परिगर्हिताः॥ १३॥

युक्ताश्चान्यैर्महादोषैर्ये नरास्तान् विवर्जयेत्।
निवर्तमाने[6] सौहार्दे प्रीतिर्नीचे प्रणश्यति॥ १४॥

या चैव फलनिर्वृत्तिः सौहृदे चैव यत्सुखम्।
यतते चापवादाय यत्नमारभते क्षये॥ १५॥

---

१ उत्तरफलयुक्तिम्। २ सर्वथा विश्वासो न विधेयः। ३ पिशुनाः। ४ निर्लज्जाः। ५ सह वसतौ। ६ गच्छति।

अल्पेप्यपकृते मोहान्न शान्तिमधिगच्छति ।
तादृशैः संगतं नीचैर्नृशंसैरकृतात्मभिः ॥ १६ ॥
निशम्य निपुणं बुध्वा विद्वान्दूराद्विवर्जयेत् ।
यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरम् ॥ १७ ॥
स पुत्रपशुभिर्वृद्धिं श्रेयश्चानन्त्यमश्नुते ।
ज्ञातयो वर्धनीयास्तैर्य इच्छन्त्यात्मनः शुभम् ॥ १८ ।
कुलवृद्धिं च राजेन्द्र तस्मात्साधु समाचर ।
श्रेयसा योक्ष्यते राजन् कुर्वाणो ज्ञातिसत्क्रियाम् ॥ १९ ॥
विगुणा ह्यपि संरक्ष्या ज्ञातयो भरतर्षभ ।
किं पुनर्गुणवन्तस्ते त्वत्प्रसादाभिकाङ्क्षिणः ॥ २४ ॥
प्रसादं कुरु वीराणां पाण्डवानां विशांपते ।
दीयन्तां ग्रामकाः केचित्तेषां वृत्त्यर्थमीश्वर ॥ २१ ॥
एवं लोके यशः प्राप्तं भविष्यति नराधिप ।
वृद्धेन हि त्वया कार्यं पुत्राणां तात शासनम् ॥ २२ ॥
मया चापि हितं वाच्यं विद्धि मां त्वद्धितैषिणम् ।
ज्ञातिभिर्विग्रहस्तात न कर्तव्यः शुभार्थिना ॥
सुखानि सह भोज्यानि ज्ञातिभिर्भरतर्षभ ॥ २३ ॥
सम्भोजनं सङ्कथनं सम्प्रीतिश्च परस्परम् ।
ज्ञातिभिः सह कार्याणि न विरोधः कदाचन ॥ २४ ॥।
ज्ञातयस्तारयन्तीह ज्ञातयो मज्जयन्ति च ।
सुवृत्तास्तारयन्तीह दुर्वृत्ता मज्जयन्ति च ॥ २५ ॥

---

१ संबन्धम् । २ अल्पा ग्रामाः अल्पार्थे हि कन्प्रत्ययः ।

सुवृत्तो भव राजेन्द्र पाण्डवान्प्रति मानद ।
[१]अधर्षणीयः शत्रूणां तैर्वृतस्त्वं भविष्यसि ॥ २६ ॥
श्रीमन्तं ज्ञातिमासाद्य यो ज्ञातिरवसीदति ।
दि[२]ग्धहस्तं मृग इव स[३] एनस्तस्य विन्दति ॥ २७ ॥
पश्चादपि नरश्रेष्ठ तव तापो भविष्यति ।
तान्वा हतान्सुतान्वापि श्रुत्वा तदनुचिन्तय ॥ २८ ॥
येन ख[४]ट्वां समारूढः परितप्येत कर्मणा ।
आदावेव न तत्कुर्याद[५]ध्रुवे जीविते सति ॥ २९ ॥
न[६] कश्चिन्नापनयते पुमानन्यत्र भार्गवात् ।
शेषसंप्रतिपत्तिस्तु बुद्धिमत्स्वेव तिष्ठति ॥ ३० ॥
दुर्योधनेन यद्येतत्पापं तेषु पुरा कृतम् ।
त्वया तत्कुलवृद्धेन प्रत्या[७]नेयं नरेश्वर ॥ ३१ ॥
तांस्त्वं पदे प्रतिष्ठाप्य लोके विगतकल्मषः ।
भविष्यसि नरश्रेष्ठ पूजनीयो मनीषिणाम् ॥ ३२ ॥
सु[८]व्याहृतानि धीराणां फलतः परिचिन्त्य यः ।
अध्यवस्यति कार्येषु चिरं यशसि तिष्ठति ॥ ३३ ॥

---

१ अनाक्रमणीयः । २ विषलिप्तबाणपाणिं व्याधमिति शे० ३ श्रीमान् यो हि श्रीमान्स्वशरणागतं दुःखितं स्वजनमन्नपानाच्छादनासनादिना नाभिरक्षति स तद्दुःखजं पापं मृगवधजन्यं व्याधइव भुङ्क्ते इति भावः । ४ मञ्चम् । ५ चञ्चले । ६ न कश्चिदिति भार्गवाच्छुक्रादन्यत्र नीतिशास्त्रकर्त्तारं शुक्रं विहाय अन्यः कश्चिदपि न अपनयते इति न अपि तु सर्वोऽप्यपनयते अनीतिं करोति अतो यदतीतं तदतीतमेव शेषस्य तत्कालोचितस्यार्थस्य प्रतिपत्तिः विचारः कर्तव्य इत्यर्थः । ७ दूरीकर्तव्यम् । ८ हितवचनानि ।